शृङ्गेरी-द्वारका-पीठ-श्रीशंकराचार्य-स्वीकृता शासन-पुरस्कृता विश्वप्रिया

सौर १ माघ १८९९ २१ जानेवारी १९७८

# शारदा

संपादकः वसन्त अ. गाडगीळ.

वर्षम् १९ अङ्कः ६

वार्षिकं मूल्यं रू. २० ❁ अस्य अङ्कस्य रू. २-५०


संपादकीयम् —

## स्थिरपदा भूयात् लोकसत्ता।

गणराज्य-दिनोत्सवः। ऊनत्रिंशत्तमः। २६ जानेवारी १९७८। गत-वर्षे अस्य गणराज्यस्य शासन-संक्रमणे या चमत्कृतिः अघटित-घटनावत् जगतीतले सर्वैः सावधानं परं सविस्मयं साक्षात्कृता तत्क्षणम् एव सर्वेषां मनसि विश्वासः सुदृढतां गतः यत् सार्वभौम-गणतन्त्रे भारते भारतीय-जन-गण-मनः सुषुप्ति-साम्राज्ये मग्नं नास्ति; परं तत्र लोकसत्ता-नन्दादीपः प्रशान्त-प्रसन्नेन प्रकाशेन जगतीतलस्थान् स्वातन्त्र्योन्मुखान् संपादयितुं प्रभवति इति।

'भारतस्य परितः सर्वत्र विभिन्नेषु राष्ट्रेषु स्थैर्यम् अभावेन तिष्ठति। रक्तपातः स्थायिभावत्वेन अनुभूयते। राजनैतिकं परस्परं सामञ्जस्यं दुर्लभतां गच्छति। आन्तरिकस्य असंतोषस्य प्रकटनार्थं लोक-सत्तात्मकं द्वारम् एव नास्ति। इयम् एतादृशी या दुरवस्था वृत्तपत्रैः स्वीयेषु स्तम्भेषु सातत्येन प्रकाश्यते तत् सर्वं दर्शं दर्शं लोकसत्ता-नाम्नी देवता निरालम्बतां गच्छेद् इति महती भीतिः सर्वत्र प्रवर्धते।

परं भारतवर्षे यद् घटितं तत् सर्वथा भारतीय-संस्कृति-प्रकृति-सहजम् एव। ऋग्वेदे यत् प्रार्थ्यते —

**गणानां त्वा गणपतिं हवामहे।**

— तत्रत्या गण-गणपति-कल्पना नातिभिन्ना गणराज्य-संकल्पनात्। तस्माद् इयं भारतभूमिः मूलभूमिः जगतीतले गणराज्यस्य गणतन्त्रस्य वा। न केवलं भारतीयानां परं समेषां मानवानाम् इदं प्रेरणा-विश्वास-शरण्य-मन्दिरं गणतन्त्र-साफल्यस्य कृते। तस्माद् एव प्रार्थयामहे विपद्-ग्रहण-मोचिता इयम् — **स्थिरपदा भूयात् लोकसत्ता।**

अस्मिन् विशेषाङ्के पठ्यताम् — **भासोऽहासः** — डॉ. ग. बा. पळसुले

(पृष्ठसंख्या १ तः २० गते दीपावली-विशेषाङ्के प्रकाशिता)

एप्रिल-तः डिसेम्बर १९७७ केवलम् मासाष्टकं कालावधिः

तावति स्वल्पकाले लक्ष-लक्ष-जन-कल्याणार्थम्

# नैके महत्त्वपूर्णाः निर्णयाः !

* १९७८-१९७९ वार्षिक-योजनार्थम् उपलब्धीकृतेषु ७०० कोटिरूप्यकेषु ५० कोटिरूप्यकाः आदिवासिकल्याणस्य उपयोजनार्थं पृथग् रक्षिताः।
* सुधारित-भूधारणा-विधानम् अनु अतिरिक्त १,४०,६९० हेक्टर-भूमितः १,०९,०१५ हेक्टर, भूमिः ७२,८९३ नवभूधारकेभ्यः वितीर्णा। तत्र अनुसूचित-ज्ञाति-समाजस्य कुटुम्बानां कृते ५० % तः अधिक-भूमिः वितीर्णा।
* १९७७-७८ ऑक्टोबरमासान्तं २७ कोटि-रूप्यकाः दैनिक-वेतना-श्वासन-योजनार्थं व्ययीकृताः।
* ग्रामीण-भागे २५कोटि-रूप्यक-व्ययेन मार्ग-निर्माणस्य प्रहार-कार्यक्रमः। ततः ७००० किलोमीटर-मार्ग-योजना।
* उद्योग-व्यवसायेषु पीडाकर-निर्बन्धानां शैथिल्यम्। अविकसित-भागेषु सभाग-निर्बन्धं निर्वर्तनम् ऋणपूर्तिः।
* स्वेच्छया कुटुम्बनियोजनम्। ग्रामीण-भागे आरोग्य-रक्षक-योजना। गृहनिर्माणाय एककोटिरूप्यकात्मकानाम् ऋण-पत्राणाम् आयोजनार्थं गृह-निर्माण-मण्डलाय अनुमतिः।
* गृहनिर्माण-गृहसुधारणा - मलिन - कुटज - वसति - सुधारार्थं विशेषस्य **प्राधिकरणस्य** तथा चतुर्णां **विभागीय-मण्डलानां** स्थापना।
* आधुनिक-तन्त्रविज्ञानम् अनु **इलेक्ट्रॉनिक-महामण्डलस्य निर्मितिः**।
* सांस्कृतिक-विकासाय **चि त्र न ग री**। चित्रपट-रङ्गभूमि-लोककला-संवर्धनाय **स्वा य त्त - म हा म ण्ड ल - स्था प ना**।
* अप्रगत-वर्गीय-कल्याण-विषयक-योजनार्थं **विशेष-महामण्डलम्**।
* ग्रामीण-छात्रेभ्यः गणिते विज्ञाने च मातृभाषा-माध्यम-**स्वातन्त्र्यम्**।
* **धर्म-यात्रा-करः** निरस्तः।
* प्रशाला-महाविद्यालयानां सार्वजनिक-वाचनालयानां, श्रमिक-महिलानां तथा विद्यार्थिनां वसतिगृहाणां क्रीडाङ्गणानां च कृते **महानगर-पालिका-क्षेत्रस्था** उपलब्धाः भूः संप्रति स्वल्पातिस्वल्प-मूल्येन।
* वैद्यकीय-महाविद्यालयेषु ऑक्टोबर७७मध्ये ७०० अतिरिक्तस्थानानि।

**माहिती-जनसंपर्क-महासंचालनालयः महाराष्ट्र-शासनम्, मुम्बई**

# प्रास्ताविकम् ।

**भासनाटकचक्रम्** । बहोः कालात् पूर्वं पठितम् । सगुणं सदोषं च सत् तद् यथाऽस्ति तथा रुचितम् । एम. ए. परीक्षा-निमित्तम् अध्ययन-काले भास-समस्याम् अन्तरेण केषांचन विमर्शन-ग्रन्थानाम् अध्ययनं संपन्नम् । भासः कुत्रापि हृदय-कोणे अबोधपूर्णं लब्धास्पदः अतिष्ठत् ।

भासनाटकचक्रं किल छेकैः परीक्षणार्थं पावके परिक्षिप्तम् (यस्माच्च अग्निदिव्यात् केवलं 'स्वप्नवासवदत्तम्' अक्षतम् उत्थितम् ।) इति हि नाटच-रसिकेषु चिरपरिचितः प्रवादः । मां तु अयं प्रश्नः सदैव आयासयति स्म यत् किं सत्यमेव गुण-दोष-परीक्षणार्थमेव भासनाटकानाम् अग्निदिव्यं सोढव्यम् आसीत्, उत भवितव्यं तत्र केनापि कारणान्तरेण ? न खलु अन्यकविविषये एवम् अग्निदिव्य-कथा मया तावत् श्रुताऽस्ति ।

अथैकस्मिन् दिने सहसा भातम् । भासेन हि रामायण-महा-भारताभ्यां कथाबीजम् आदाय सन्ति अनेकानि नाटकानि रचितानि । एकतस् तेन कथायां बहूनि परिवर्तनानि कृतानि सन्ति । अपरतश्च खल-पात्राणां उन्नयनमपि स करोति । (सर्व-संस्कृतज्ञेषु प्रथितत्वात् नेदमत्र सोदाहरणं प्रपञ्च्यते) अपि इदमेव जनस्य रोष-कारणं स्यात् ? यदा तावत् संप्रत्यपि, अस्मिन् विंशतितमे शतकेऽपि, रामायण-भारतीय-कथानां विकृतीकरणं तत्रस्थानां खल-पात्राणाम् च उदात्तीकरणम् अनेकैर् नानुमन्यते, तदा द्विसहस्रवर्ष-पूर्वे काले आस्तिकतरया तदानींतनया जनतया यदि तन्न संमतं स्यात्, तर्हि किमत्र चित्रम् ? तस्माद् यदि नाम भास-नाटकानाम् अग्निदिव्य-रूपा इयं कथा वास्तविकी घटना स्यात् तर्हि तत्र भास-कृतेन रामायण-महाभारतयोर् विपर्यासेन जनितः प्रजारोषोऽपि कारणं स्यादिति विचारः मम मनःक्रमेण गृहीकर्तुं प्रवृत्तः । नाटच-बीजं लब्धम् ।

सकृत् नाटचबीजे स्फुरिते, तस्य विकासनार्थं भासनाटकचक्रं पुनः पुनः पठित्वा घटना-प्रपञ्चः निर्धारिताः । नाटकस्य कथा-वस्तु मूलतया भासकृतः रामायण-महाभारतयोः इदंपूर्वः उपयोगः, भासोपज्ञ दुःखान्त-नाटक-प्रणयनम्, भास-नाटकेषु बहुशो निर्दिष्टः कश्चित् राज-सिंहः, परचक्रम्, तत्र वर्तमानाः अपाणिनीयाः प्रयोगाः, तत्र क्वचित् दृश्यमानं भरतादिभ्यो भिन्नं नाटचतन्त्रम्, '**भासो हासः**' इति सुभाषित-प्रसिद्धा तस्य कीर्तिः (तत्र अकारप्रश्लेषं कृत्वा अयं शब्दप्रयोगः मया

'लुप्तहास्यो भासः' इत्यर्थकः सन् अस्य नाटकस्य नामत्वेन प्रयुक्तोऽस्ति। 'भासस्य शोकान्तिका' इति यावत्।) सुभाषित-संग्रहेषु भासीयत्वेन निर्दिष्टानि सुभाषितानि, 'ज्वलन-प्रिय' इति क्वचिद् उपयुक्तः भासोपाधिः, कालिदासेन भासनाम्ना सदैव निर्दिष्टौ द्वौ अन्यौ नाटककारौ, बहुकालोत्तरम् अनपेक्षिततया उपलब्धः भास-नाटक-संग्रहः, भासीया भाषाशैली इत्यादि सामग्रीम् उपयुज्य इदं नाटकं प्रणीतमस्ति। प्रथमाङ्क-लेखनोत्तरं केभ्यश्चित् सुहृद्भ्यः स प्रदर्शितः। तैः संमतिपूर्वकं प्रोत्साहितेन मया लेखनं समाप्तिं नीतम्। रसिक-धौरेयैः प्राचार्य न. गं. सुरू महोदयैः हस्तलिखितं पठित्वा भूरि अभिनन्द्य, तस्य प्रस्तावना-लेखनम् सानन्दम् अङ्गीकृतम्।

रामायण-महाभारतौ उपजीव्य लिखितासु कृतिषु कियत् स्वातन्त्र्यं लेखकेन अवलम्बनीयम् इति प्रश्नः आधुनिक-वाङ्मयेऽपि तीव्र-विवादास्पदं संजातोऽस्ति। भासश्च अस्याः नव्य-परंपरायाः आद्यः प्रवर्तयिता। अतः अद्य अपि नाटकीयवस्तुत्वेन अयं विषयः नैव यातयामतां गतोऽस्ति। प्रत्युत सः किमपि औचित्यं बिभर्ति।

इदमेकम् अत्र अवधातव्यम्। नाटकमात्रमिदम्। त्रिवेन्द्रम्-तः **श्री ग ण प ति शा स्त्रि भिः** प्रथमं प्रकाशितं भासनाटकचक्रं कालिदासेन निर्दिष्टस्य ऐतिहासिकस्य भासस्यैव रचना इति मे मतिः इति न भ्रमितव्यम्। स एव भासः भासनाटकचक्रस्य प्रणेता स्याद्वा, न वा। एतद्-विचार-निरपेक्षम् एव एतन्नाटकं प्रणीतमस्ति।

अथैकदा एतन्नाटकलेखनोत्तरं नासिकस्थः सुहृद् प्रा. एम् बी. कुलकर्णी-महाभागः यदृच्छया मिलितः तन्मुखात् मया श्रुतं यद् भासम् अधिकृत्य तेन नैके लेखाः लिखितपूर्वाः सन्ति। इदमपि मया अनुभूतम्। यत् भासीय-नाटकानाम् अग्निदिव्यमन्तरेण अवयोः विचाराः प्रायः एकरूपाः। अहो संवादः!

श्रीमती प्रतिभा गोखले MA. PhD. सुवाच्यां मुद्रणप्रतिं कृतवती।

'शारदा'कारैः पं. गाडगीळ वसन्तरायैः अविगणित-लाभालाभैः जन्मसहभुवा साहसेन सुभगाकारोऽयं भासः वाचकहस्तं प्रापितः। सर्वेभ्यः धन्यवादाः।

— **ग. बा. पळसुले**

# द्वितीयोऽङ्कः ।

## प्रथमं दृश्यम् ।

(स्थानम् : रथ्या । ततः प्रविशतः एकतः देवरातः, अन्यतश्च वसुमित्रः । शून्यमनाः वसुमित्रः देवरातम् अदृष्ट्वैव अग्रतो गच्छति । ततः) —

**देवरातः** — वसुमित्र ! अयि भोः वसुमित्र ! कस्मिन् महति कार्ये व्यापृतोऽसि, येन माम् अतिक्रम्यापि अनादृत्येव गच्छसि ?

**वसुमित्रः** — कथम्, देवरातः ? देवरात ! अन्यगतमनस्केन मया नैव आलक्षितो भवान् । तत् क्षम्यताम् ।

**देवरातः** — अस्तु । अस्तु । बहोः कालात् अनन्तरं दृश्यसे । मोमुह्यते नश्चेतः । मोमुह्यतेतरां नश्चेतः । कथं वर्तसे ? कच्चित् सर्वं कुशलम् ?

**वसुमित्रः** — (निःश्वस्य) कुशलम् । सर्वं कुशलम् ।

**देवरातः** — अथ कस्मिन् महति उद्योगे व्यापृतोऽसि, येन समीपगामिनमपि मां न लक्षयसि ?

**वसुमित्रः** — न कस्मिन्नपि । एवमेव शून्यमनाः आसम् ।

**देवरातः** — अश्रद्धेयम् । सुतराम् अश्रद्धेयम् । को वा विश्वस्यात्? कुतोऽयं निःश्वासः ? केनापि रहस्येन भाव्यम् । आस्तां तावत् । आस्तां तावत् । अथ किंव्यापारः संप्रति भवान् ? किमपि नवीनं नाटकम् ?

**वसुमित्रः** — नाटकम् ! नामापि मा गृहाण ।

**देवरातः** — हन्त ! हन्त ! ननु किं संजातम् ?

**वसुमित्रः** — समाप्तम् । तत् पर्व समाप्तम् । अधुना नाटकलेखनस्य कथामपि मा कृथाः ।

**देवरातः** — महान् खलु तव निर्वेदो दृश्यते । ननु जातमेव किम्?

**वसुमित्रः** — 'जातमेव किम् ?' अहं पृच्छामि, किं फलं नाटकलेखनेन ? मया कामं नाटकानि लिख्यन्ते, पश्यति वा कश्चित् कंचित् गुणलवमपि तत्र ?

**देवरातः** — ननु स्पर्धायां यदि गते वर्षे पारितोषिकं न लब्धम्, माऽस्तु। ऐषमो लप्स्यसे। न दूरवर्तिनी भाविनी स्पर्धा।

**वसुमित्रः** — दत्तोऽस्ति मया पारितोषिकाय जलाञ्जलिः। यावत्पर्यन्तम् अयं राजवल्लभः, अयं भासकः वर्तते, तावत्पर्यन्तं न स्वप्नेऽपि केनापि पारितोषिकविषये साभिलाषेण भवितव्यम्। भस्मसात् भवन्तु तस्य नाटकानि।

**देवरातः** — (स्वगतम्) विप्रकरोमि तावत् एनम्। (प्रकाशम्) ननु निर्णयं तावत् परिषत् करोति, न देवः। किं परिषदमपि पक्षपातिनीं मन्यसे?

**वसुमित्रः** — अथ किम्? पारिषद्याः अपि राजकृपा-कामुका वा, तद्-रोष-परिजिहीर्षवो वा।

**देवरातः** — भवतु। तिष्ठतु एष पारितोषिक-विषयः। अन्ये तु केऽपि अ-परप्रत्ययनेयाः, तव कृतीनां गुणग्राहिणो रसिकाः स्युरेव।

**वसुमित्रः** — न कोऽपि। न कोऽपि पारमार्थिकः। देवरात! भवान् कामं न्याय-वेदान्तं जानातु, न तु जनमानसम्। जनो नाम अजः। निमीलित-नेत्रोऽयं पुरुषाजः पुरोवर्तिनम् अनुगच्छन् गर्तायामपि पतेत्, न तु स्वे नेत्रे उपयुञ्जीत।

**देवरातः** — एवं भणसि? स्यादपि तथा। अथ वा, तिष्ठतु इदम् अन्यकृतं रसग्रहणम्। स्वान्तःसुखायापि तावत् किमिति न लिखसि?

**वसुमित्रः** — स्वान्तःसुखाय? गर्तां गच्छतु स्वान्तःसुखम्! न कोऽपि स्वान्तःसुखाय लेखनीम् आयासयति।

**देवरातः** — भासस् तावत् वदति, अहं स्वान्तःसुखाय लिखामीति।

**वसुमित्रः** — दम्भः। विशुद्धो दम्भः। न कोऽपि स्वान्तःसुखाय लिखति। न जाने कुतः सर्वेऽपि भवन्तः मन्त्रमुग्धा इव लुप्तविवेकाः सन्ति। भासः, भासः, भासः! स किल नाटककारः, यो नाट्यशास्त्रं नाम कस्य पक्षिणो नामधेयम् इति इदमपि न जानाति!

**देवरातः** — कथं नाम इदं संभवेत्?

**वसुमित्रः** — 'कथं नाम इदं संभवेत्?' ननु संपन्नम्। संपन्नम्

अस्ति इदम् । समग्रं नाटचशास्त्रं मम कण्ठस्थं वर्तते। अहं कथयामि, नाटचशास्त्रस्य सर्वान् विधि-निषेधान् तृणीकृत्य अयं भासो नाटकानि रचयति ।

**देवरातः** —(स्वगतम्) अयम् एवमेव समुत्तेजनीयः। (प्रकाशम्) वसुमित्र ! अहं तावत् केवलं न्याय-वेदान्तज्ञः । त्वयैव तथा उक्तम् । तथापि न तव वचनं यथार्थमिव प्रतिभाति । यदि भासः सत्यमेव एवं नाटचशास्त्रानभिज्ञः स्यात्, कथं रङ्गमञ्चे एवं प्रभाववन्ति नाटकानि लिखितुं प्रभवेत् ?

**वसुमित्रः** — कीदृशः प्रभावः ?ननु उक्तमेव मया—गतानुगतिको लोकः। एकेन भासः प्रशंसितः, इतरे प्रशंसितुम् आरभन्त। आस्तां तावद् इदम् । अपरम् इदं कथयामि ।

**देवरातः** — किम् अपरम् ?

**वसुमित्रः** — अयं भासः पाणिनीयमपि न जानाति। कियन्तो नु अस्य घोराः व्याकरण-प्रमादाः। अञ्जलिशः, अक्षरशः अञ्जलिशः उद्धृत्य प्रदर्शयितुं शक्नुयाम् ।

**देवरातः** — न खलु परिहासं करोषि ?

**वसुमित्रः** — 'परिहासम् ?' अयं म-हा-न् नाटककारः तादृशान् प्रमादान् करोति, यान् रूपावलि-समासचक्रमात्रपरिचितः पाठशालीयो बटुरपि न कुर्यात् । अयं न गणं गणयति। न पदम् अवेक्षते। न संधीन् अनुसंधत्ते। न लिङ्गम् आद्रियते । न विभक्तीः विभजति। अयं किल म-हा-न् नाटककारः ।

**देवरातः** — यदि सत्यम्, विलक्षणमेव इदम् ।

**वसुमित्रः** — 'यदि सत्यम् ?' प्रमाणानि दास्यामि। नाहं प्रमाणं विना किमपि अभिदधामि।

**देवरातः** — ननु अपूर्वमेव इदं श्रूयते।

**वसुमित्रः**— अद्यापि किं श्रुतं भवता ? श्रूयताम् इदम् अन्यत् । इदानीमेव रामायण-महाभारते उपजीव्य कानिचित् नाटकानि भासेन लिखितानि सन्ति ।

**देवरातः** — लिखितानि वा ? तथा खलु तदानीं गौरवोपाधि-वितरणावसरे उद्घोषितम् आसीत् तेन ।

**वसुमित्रः** — लिखितानि। देवरात ! द्वादश वर्षाणि रामायणं श्रुत्वापि अयं भासः इदमपि न जानाति सीतारामयोः कः संबन्धः ?

**देवरातः** —( सहसा सावधानः ) किमुक्तम् ? न खलु मया अवधारितम्।

**वसुमित्रः** — अनेन भासेन रामायणं महाभारतं च उपयुज्य नाटकानि लिखितानि सन्ति। किं तु सत्यमेव तेन रामायण-महाभारते पठिते, न वा, इति महान् मे संशयः।

**देवरातः** — (अधुना अधिकोत्सुकः) कुतः ?

**वसुमित्रः** — सर्वम् अबद्धम्। नास्ति तस्य नाटकानां रामायण-महाभारताभ्यां सह कोऽपि संवादः। किमपि नवीनमेव कल्पितमस्ति तेन।

**देवरातः** — (स्वगतम्) न हि भासो नाम कश्चित् अज्ञः, य एवम् अज्ञानात् कुर्यात्। यदि इदं सत्यम्, हेतुत एव तेन इत्थं कृतं स्यात्। (प्रकाशम्) एवं भणसि ? कथं नाम त्वया इदं ज्ञातम् ? न अद्यापि तानि नाटकानि प्रयुक्तानि सन्ति।

**वसुमित्रः** — मया स्वयं भासमुखात् श्रुतम्। पठितं च किंचित्।

**देवरातः** — भासेन तुभ्यं नाटकानि प्रदर्शितान्यपि ?

**वसुमित्रः** — अथ किम् ?

**देवरातः** — ( स्वगतम् ) नूनम् अतिमात्रम् ऋजुकेन तेन भवितव्यम्।

**वसुमित्रः** — देवरात ! किं विचार्यते ?

**देवरातः** — वसुमित्र ! त्वम् अस्मिन् वर्षे स्पर्धायां पारितोषिकं विजिगीषसे नु।

**वसुमित्रः** — किं मम इच्छया ? यावत्पर्यन्तं भासः प्रतिस्पर्धते...

**देवरातः** — यदि भासः प्रतिस्पर्धी न स्यात्, तर्हि त्वमेव पारितोषिकं विजेष्यसे इति निश्चितोऽसि ?

**वसुमित्रः** — (इदानीम् उत्साहितः) कोऽत्र संदेहः ? किं तु ...

**देवरातः** — मां शृणु। एवमेव भासेन सह संसृज्यस्व। तस्य नाटकानि पठ। भासं वा आलापय। यच्च किंचित् नाटकेषु एतादृशं नवीनम् उपलभ्येत, तत् आगम्य मह्यं निवेदय। ततः किं करणीयम्, तत् पश्चात् निवेदयिष्यामि।

**वसुमित्रः** — एतावदेव ?

**देवरातः** — एतावदेव । तावदेव पर्याप्तम् । यदि इदं कृतम्, तर्हि अस्मिन् वर्षे विजयं तव हस्तगतं विद्धि ।

**वसुमित्रः** — एष प्रस्थितोऽहम् । (निष्क्रान्तः)

**देवरातः** — एष उपायो दृष्टः । यदि इमम् उपायम् अवलम्ब्य एतं भास-कण्टकं नोद्धरिष्यामि, नास्मि देवरातः । अहं चाटुकारो नु ! (निष्क्रान्तः ।)

( जवनिकापातः )

## द्वितीयं दृश्यम् ।

[ स्थानम् : भासगृहम् । भासस्य पटले उपदशानि हस्तलिखित-पुस्तकानि सुष्ठु स्थापितानि दृश्यन्ते । जवनिकायाम् उत्क्षिप्तायां शारद्वतः किंचित् अनुवाचयन् दृश्यते । ततः द्वित्रैः क्षणैः नेपथ्ये 'अस्ति किं गृहे भासः ?' इति प्रश्नः श्रूयते । ]

**शारद्वतः** — सौमिल्लकस्य शब्द इव । ( गत्वा द्वारम् उद्घाटयति । सौमिल्लकः प्रविशति ।) एतु, एतु भवान् । इदम् आसनम् । आस्यताम् ।

**सौमिल्लकः** — (उपविश्य) किमपि पठनपर इव दृश्यसे । अस्ति वा आर्यभासो गृहे ?

**शारद्वतः** — अस्ति । अन्तर्गृहे वर्तते आचार्यः । अहम् आचार्याय भवदागमनं निवेदयामि । (निष्क्रान्तः । सौमिल्लकः पटलं गत्वा, यदृच्छया एकं पुस्तकं गृहीत्वा तस्य पृष्ठानि परिवर्तयन् आस्ते । ततः प्रविशति शारद्वतेन अनुगम्यमाना संगीता । )

**संगीता** — स्वागतं देवरदेवाय सौमिल्लकाय । आर्य ! को विशेषः ?

**सौमिल्लकः** — (पुस्तकराशिं निर्दिशन्) विशेषस् तावत् अत्रैव स्यात् । अथ किमुद्योगो भासः ?

**संगीता** — नित्यम् आह्निकं निर्वर्तयति । समाप्तप्रायमेव अस्ति । एष आगमिष्यत्येव आर्यपुत्रः ।

**सौमिल्लकः** — (पुस्तकराशिम् अवलोकयन्) गतेषु केषुचित् दिवसेषु द्वित्राणां नाटकानां नवप्रसूतिरिव दृश्यते ।

**संगीता** — जानात्येव भवान् आर्यपुत्रम् । सकृत् केनचित् नाटकेन गृहीकृतमना भवतु, आविष्ट इव व्याप्रियेत । अन्यस्मिन्निव जगति वर्तते । भोजनस्यापि स्मारयितव्यो भवति ।

**सौमिल्लकः** — (सपरिहासम्) केवलं स्मारयितव्यो भवति ? उत ... ... उक्तमेव नु 'भोज्येषु माता !'

**संगीता** — अपेहि ! शारद्वत ! पश्य तावत् आर्यपुत्रस्य अनुष्ठानं समाप्तं, न वा ।

**सौमिल्लकः** — तिष्ठ ! मा भूत् तस्य कार्योपरोधः । नास्ति मे किमपि गुरुकं प्रयोजनम् । शारद्वत ! किमिदानीं त्वं पठन् आसीः ?

**शारद्वतः** — (सोत्साहं पटलात् पुस्तकं गृहीत्वा, सौमिल्लकं च उपगम्य) आर्य ! दृश्यताम् । आचार्येण अचिर-ग्रथितं 'दूतघटोत्कचम् ।' अनुपमम् !

**संगीता** — अयं शारद्वतस् तावत् इदानीं न किमपि व्यापारान्तरं जानाति । यदा कदापि दृश्यताम्, अयं तावत् आर्यपुत्रस्य नाटकानां स्वाध्यायपरः ।

**शारद्वतः** — भवति ! सकृत् मधुकोशं लब्ध्वा भल्लूकः किम् अपरं कुर्यात् ? (सर्वे हसन्ति ।)

**सौमिल्लकः** — एवम् ? ब्रूहि तावत्, भास-नाटकेषु किं वा मधु त्वया आसादितम् ?

**शारद्वतः** — भोः, निगृहीतोऽस्मि । प्रयतिष्ये तावत् । इदं तावत् अवधारणीयम् – यत्तत् मुख-प्रतिमुखादि-संधि-संध्यङ्गादिकम् आरम्भ-यत्नादिकार्यावस्थादिकं वा, तदत्र सम्यक् परिपालितं न वेति नाहं जानामि । तत् बालविच्छेदनं भवन्त एव कुर्वन्तु । अहं केवलं मादृशस्य प्राकृतजनस्य अभिप्रायं वक्ष्यामि ।

**सौमिल्लकः** — ननु तदेव अभिप्रेतम् । नाटकविषये प्राकृतपुरुष-स्यैव अभिप्रायः महत्त्वं बिभर्ति ।

**शारद्वतः** — श्रूयतां तर्हि । संक्षेपत इदं वक्तुं शक्यम्, यत् एता-वत्कालपर्यन्तं केवलं श्रव्यकाव्यम् आसीत्, तद् अधुना दृश्यकाव्यमपि

संजातम् । ते ते पौराणिक-पुरुषाः अत्र तथा खलु आचार्येण उपस्थापिताः सन्ति, यथा नाटकपठनावसरे साक्षात् पुरतः उपतिष्ठन्तीव । स करुणैक-रसः, मूर्तिरिव कर्तव्यपूर्तेः, घनश्यामो रामः; स नीतिनिपुणः,पूर्णावतार इव नारायणस्य, पुरुषोत्तमः श्रीकृष्णः; स 'येनैव मानेन समं प्रसूतस् तेनैव मानेन दिवं' प्रयातः दुर्योधनः; सः अर्जुनार्थे अङ्गीकृतयाचना-लाघवः शिष्यवत्सलो द्रोणाचार्यः; तौ बालवीरौ अभिमन्युघटोत्कचौ; स निजदेह-निरपेक्षः, प्राणव्ययेनापि पूरितयाचकमनोरथः वदान्यः कर्णः; सः अत्यन्तत्यक्तस्वार्थः भ्रातृदेवो भरत; सा पतिव्रतादर्शः राममयजीविता सीता — सर्वे एते देहबद्धा इव, जीवन्त इव, अस्मत्पुरतः उपतिष्ठन्ति । यदा तावत् पठनमात्रस्य अयं प्रभावः तदा नाटकदर्शनेन किं भवेत्? रङ्ग-मञ्चस्था एते जाने ... जाने ...

**सौमिल्लकः** — किमिति ?

**शारद्वतः** — जाने कदाचित् अस्माभिः सह भाषितुमपि आरप्स्यन्ते ते ।

**सौमिल्लकः** — (सपरिहासम्) भाग्यवांस् त्वम् । यदि किंचित् ते त्वां ब्रूयुः, अस्मभ्यमपि तत् निवेदयितुं प्रसीद ।

**शारद्वतः** — अवश्यम्, यदि ते भवन्तं निवेदनार्हं मन्येरन् ।

**संगीता** — (हसन्ती) साधु! शारद्वत! निपुणोऽसि । ननु भणामि, आर्यपुत्रस्य इदं स्फुरणं प्रातिभमेव । कियत् भव्यदिव्यम् ! इदं तद्, यत् स्वयं मुनिना व्यासेनोक्तम् — 'इतिहासोत्तमादस्माज्जायन्ते कविबुद्धयः ।'

**सौमिल्लकः** — सत्यमाह भवती । अत एव भासो भासः, वयं च वयम् ।

**शारद्वतः** — न भासो भासः । इदानीं भासो हासः ।

**संगीता-सौमिल्लकौ** — (हसन्तौ) सत्यम् । सत्यम् !

**शारद्वतः** — अन्यदेकम् आर्य ! एतेषु नाटकेषु केचन प्रसङ्गाः तथा नाम कल्पिताः सन्ति ! अहो उत्प्रेक्षणनैपुणम् आचार्यस्य ! मन्ये ते महाभारते न सन्ति ।

**सौमिल्लकः** — यथा ... ?

**शारद्वतः** — यथा अत्र 'पञ्चरात्र'-नाटके (उत्थाय पुस्तकम् आदाय, उद्घाट्य, सौमिल्लकाय ददाति) गोग्रहणप्रसङ्गो वर्तते ।

बृहन्नलारूपिणा उत्तरसारथिना अर्जुनेन कौरवाः पराजिताः सन्ति। ते च पराङ्मुखाः भूत्वा अहमहमिकया रणाङ्गणात् पलायितुम् आरभन्ते। अभिमन्युस्तु . . .

**सौमिल्लकः** — ( साश्चर्यम् ) अभिमन्युः ?

**शारद्वतः** — अभिमन्युः। अस्मदाचार्येण सोऽपि तत्र आनीतोऽस्ति। स तु जङ्घाबलम् आश्रितेष्वपि अन्येषु कुरुवीरेषु अभिनवसमरव्यापारेण आकृष्टमनाः, जन्मसहभुवा युयुत्सुतया च अभिभूतत्वात् भयलेशेनापि अस्पृष्टचित्तः, तथैव युध्यमान आस्ते। तमेवम् एकाकिनं युध्यमानं बल्लवरूपधरः भीमः पश्यति। दृष्ट्वा च 'अये अयं तावत् अस्मदानन्दवर्धनः अभिमन्युः' इत्यभिज्ञाय, तद्रथम् उपगम्य, हस्तमात्रबलेन रथम् अवष्टभ्य, अभिमन्युं रथात् अवतारयति। ततश्च 'अयमपि तावत् तपस्विन्याः द्रौपद्याः दुःखविनोदाय भवतु' इति बुद्धया अभिमन्युं भुजैकयन्त्रितमपि अपीडितं विराटनगरं वहति। तत्र स्वपितॄन् अनभिजानतः अभिमन्योः तैः सह यः संवादो भवति, सः अवश्यं श्रोतव्यः। भीमार्जुनौ तावत् क्रीडार्थं तं तैस्तैः प्रकारैः तुदतः, खेदयतः, परिहसतः, आपाततः उपहसतश्च। अहो तदानीम् अभिमन्योः अवष्टम्भः ! अहो स सहजाभिमानः, सा निर्भीकता, सा क्षत्रश्रीः, स च धीरोद्धतः पदन्यासः ! क्षात्रधर्म इव शिशुरूपधरः !

**संगीता** — मया तावत् यदा इदं पठितम्, चिन्तये इदं गत्वा वत्सं कठोरम् आलिङ्गामीति।

**सौमिल्लकः** — (स्वगतम्) हन्त भोः ! पुत्रवञ्चितः कविः, इयं च तदवस्था सहृदया, उभावपि अनया रीत्या यथाकथंचित् मानसीं तृप्तिम् अनुभवतः।

**संगीता** — आर्य ! किं विचार्यते ?

**सौमिल्लकः** — न किमपि। ... ननु पृच्छामि भ्रातृजाये ! त्वयापि भासनाटकानि पठितानि ?

**संगीता** — अथ किम् ? को वा आर्यपुत्रस्य नाटकानां सुवाचनीयाः प्रतिलिपीः करोति ? ललाट-लिखितमपि कदाचित् पठितुं शक्येत, न तु आर्यपुत्रस्य अक्षरविन्यासः। तद् अस्तु। पूर्वेद्युः 'मध्यमव्यायोगं'

पठन्ती आसम् । घटोत्कचस् तावत् राक्षसीपुत्रः । तथापि कियती नु तस्य मातृभक्तिः !

**सौमिल्लकः** —– यथा अहं पश्यामि, घटोत्कचस्य स्वभावचित्रे अयं नूतन एव वर्णः भासेन अर्पितः ।

**शारद्वतः** — अत्र दूत-घटोत्कचे घटोत्कचः दूतत्वेन धार्तराष्ट्रसभां प्राप्नोति। अभिमन्युवधेन संजातरोषः जनार्दनः घटोत्कचमुखेन इमं तीक्ष्णं संदेशं धृतराष्ट्राय प्रेषयति — 'पितामह ! एकपुत्रविनाशात् अर्जुनस्य एवं करुणावस्था संजाता, तर्हि शतपुत्रविनाशात् तव कीदृशी भविष्यति ? तत् धर्माचरणादिना यत् आत्मबलाधानं कर्तव्यम्, तद् अधुनैव प्रारभस्व' इति। अहो धृष्टता श्रीकृष्णे च भक्त्यतिशयः एतत्-संदेशहरस्य घटोत्कचस्य !

**सौमिल्लकः** — नूनं भासोपज्ञम् अयं दूतसंपातः ।

**संगीता** — 'अभिषेक'-नाटकगतः सीतारावणप्रवेशः मां विशेषं विलोभयति । सीता तावत् असहाया, एकाकिनी, विकट-राक्षसीमण्डल-परिवृता आस्ते। रावणः तत्र आगच्छति । निर्जितसुरासुरः, कम्पित-कैलासः, अशेषजगत्प्रभुश्च सन्नपि मदनेन विह्वलः परवशश्च भूत्वा स ताम् अनुनयति । 'सीता तु दीनो वा राज्यहीनो वा यो मे भर्ता स मे पतिः' इति श्रद्दधाना रावणं धिक्करोति। राक्षसस्य सतोऽपि रावणस्य तत् पतिव्रतातेजो माननीयं भवति ।

**शारद्वतः** — इदं रावणस्य पतिव्रतातेजोमाननं द्विः आवर्तते, 'प्रतिमा'यां च, 'अभिषेके' च ।

**सौमिल्लकः** — त्वया भासनाटकानि अतीव सूक्ष्मेक्षिकया अधीतानि इति भाति ।

**शारद्वतः** — मम तावत् इयं शङ्का, कुतः आचार्येण रामकथाम् आश्रित्य एते द्वे नाटके प्रणीते ? कदाचित् आचार्यः इदं प्रष्टव्यः ।

[ नेपथ्ये भासशब्दः —

**पायात् स वोऽसुरवधूहृदयावसादः**
**पादो हरेः कुवलयामलखड्गनीलः ।**
**यः प्रोद्यतस्त्रिभुवनक्रमणे रराज**
**वैडूर्यसंक्रम इवाम्बरसागरस्य ॥ १ ॥**

**नारायणस् त्रिभुवनैकपरायणो वः**
**पायाद् उपाय-शत-युक्तिकरः सुराणाम् ।**
**लोकत्रयाविरत-नाटक-तन्त्र-वस्तु-**
**प्रस्तावन-प्रतिसमापन-सूत्रधारः ॥ २ ॥ ]**

**संगीता** — एष आगच्छत्येव आर्यपुत्रः । (ततः प्रविशति भासः।)

**भासः** — कथं, सौमिल्लकः ? अहो सुप्रभातम् अद्य, येन प्रियवयस्यो दृष्टः । ननु गतान् पञ्चषान् दिवसान् कुत्र आसीः ?

**सौमिल्लकः** — अस्ति किंचित् रहस्यम् ।

**भासः** — ( सपरिहासम् ) रहस्यम् ? तर्हि अवश्यं श्रोतव्यम् । नास्ति परस्य रहस्य-श्रवण-सदृशम् अन्यत् आनन्दकरं वस्तु ।

**सौमिल्लकः** — ज्ञास्यसि यथाकालम् ।

**भासः** — अवगतम् । नूनम् आगामि-स्पर्धार्थं नवनाटक-विरचने व्यापृतेन भवितव्यं त्वया ।

**सौमिल्लकः** — मम नाटकं तावत् तिष्ठतु । इदानीं वयं तवैव नाटक-विषये मन्त्रयमाणा: आस्म ।

**भासः** — एवम् ? (कृतक-गाम्भीर्येण) कस् तर्हि न्याय-मण्डलस्य निर्णयः ?

**सौमिल्लकः** — 'न्याय-मण्डलस्य निर्णयः ?' के वयं तव कृतीनां गुण-दोष-निर्णयं कर्तुम् ? वयं तावत् तासाम् अवगति-प्रयत्नेन, एकार्धगुणग्रहणमात्रेणापि च संतुष्यामः ।

**संगीता** — एष शारद्वतः किमपि युष्मान् प्रष्टुम् इच्छति ।

**शारद्वतः** — आचार्य ! किमिति रामकथाम् उपन्यस्तुं भवता द्वे नाटके विरचिते ? किम् एकं पर्याप्तं न स्यात् ? उभे अपि नाटके रावण-वधान्ते ।

**भासः** — समानान्ते, न तु समानादी । किं च तयोः अवधारणं भिद्यते । विवक्षा भिद्यते ।

**शारद्वतः** — कथमिव ?

**भासः** — इत्थं तत् । इतिवृत्त-निवेदकस्य तावत् कथा-निवेदने तात्पर्यम् । न तत्र हानोपादानयोः कश्चित् अवसरः । तामेव कथां

नाटचीकुर्वतः कवेस्तु विवक्षानुसारेण किंचित् हेयं भवति, किंचित् उपादेयम्। स तावत् चित्रकार-सदृशः। यथा कश्चित् चित्रकारः किंचित् दृश्यं सामग्र्येण पश्यन्नपि चित्रे तावत् कंचिदेव अंशं पुरोभागे प्राधान्येन निवेशयति, कंचित् पृष्ठभूमौ निक्षिपति, कंचित् च वर्जयत्यपि। स एव प्रकारः नाटचीकृतायाः कथायाः अपि भवति। यथा च चित्रकारस्य दिदर्शयिषानुसारेण एकमेव दृश्यं तैस्तैर् अंशतो भिन्नैः चित्रैः दर्शयितुं शक्यते, एवं एकैव कथा विवक्षानुसारेण अनेकैः नाटकैः। अथ वा, इतस् तावत्। (एकं वातायनं गच्छति। शारद्वतः तम् अनुसरति।) किं पश्यसि?

**शारद्वतः** — गिरिः, उपत्यका, दक्षिणवाहिनी नदी।

**भासः** — अधुना इतस् तावत्। (तं द्वितीयं वातायनं नयति।) इदानीं किं पश्यसि?

**शारद्वतः** — स एव गिरिः, सैव उपत्यका, सैव च नदी। किं तु केनचित् भिन्नेन रूपेण।

**भासः** — मम द्वे नाटके अपि वातायने विद्धि, याभ्यां मया रामकथा प्रदर्शिता।

**शारद्वतः** — अवगतम्। प्रतिमायां भरतस्य स्वार्थत्यागः मातृभक्तिश्च, कैकेय्याश्च स्वभावलेखनम् आचार्यस्य प्राधान्येन विवक्षितम्। अभिषेके तु रावणस्य कामुकता, सीतायाश्च पातिव्रत्यम्। एवमेव नु?

**भासः** — सुष्ठु गृहीतस् त्वया ममाभिप्रायः।

**सौमिल्लकः** — वयस्य! ममापि किंचित् प्रष्टव्यं वर्तते।

**भासः** — छन्दतः।

**सौमिल्लकः** — यथा अहं पश्यामि, न त्वया रामायणकथा, महाभारतकथा वा यथास्थिता उपात्ताऽस्ति। बहुषु स्थलेषु सा त्वया परिवर्तिताऽस्ति। बहवो नूतनाः प्रसङ्गाः अपि त्वया परिकल्पिताः सन्ति। पात्राणां स्वभावचित्राणि अन्यथाकृतानि सन्ति। अत्र कियत् स्वातन्त्र्यं नाटककारेण अवलम्बितव्यम् इति विषये मम तावत् संशयो भवति। अहं तावत् मन्ये . . .

**भासः** — किं मन्यसे? स्वैरं ब्रूहि।

**सौमिल्लकः** — कल्पितकथानां परिवर्तने भवन्तु नाम नाटककाराः

साधिकाराः, ऐतिहासिककथा-विषये तु तेषां मूले अव्यभिचारिणी निष्ठा भवितुम् अर्हति।

**भासः** — नाहं तथा मन्ये। तथापि भवतोऽपि मतिः अवगन्तुं शक्या। वसुमित्रोऽपि तथैव मन्यते।

**सौमिल्लकः** — (साश्चर्यम्) वसुमित्रः? कथं स ...

**भासः** — सोऽपि मम नाटकानि जानाति। कानिचित् पठितान्यपि तेन। (सर्वे भासं साश्चर्यम् अवलोकयन्ति।)

**संगीता** — आर्यपुत्र! युष्माभिः . . .

**सौमिल्लकः** — वसुमित्राय नाटकानि प्रदर्शितानि?

**भासः** — को दोषः? यथैव तुभ्यं दर्शयामि, तथैव वसुमित्राय।

**सौमिल्लकः** — किं तु . . . जानास्येव त्वम् . . .

**संगीता** — किं तु आर्यपुत्र! अन्या देवरदेवस्य सौमिल्लकस्य कथा, अन्या च वसुमित्रस्य।

**भासः** — किं स मे प्रतिभां चोरयिष्यति?

**सौमिल्लकः** — न प्रतिभां चोरयिष्यति। किं तु तव प्रतिस्पर्धी सः।

**भासः** — ततः किम्? ननु स्वाभाविक-प्रतिभायत्ता सिद्धिः न अनुकरणसाध्या। किं च एतान् दिवसान् इदमपि मम मनसि आयाति।

**सौमिल्लकः** — किमिव?

**संगीता** — (स्वगतम्) किं नु खलु आर्यपुत्रस्य मनसि स्यात्?

**भासः** — एताः स्पर्धाः मत्सरं जनयन्ति। पराभूताः यशस्विभ्यः असूयन्ते। ते दह्यमान-मानसाः तिष्ठन्ति। मया तावत् द्विवारं पारितोषिकं लब्धम्। अधुना अन्येऽपि लभन्ताम्। न मया अद्यापि कोऽपि निर्णयः कृतोऽस्ति। किं तु चिन्तयामि . . .

(प्रविश्य)

**चतुरिका** — एष भटः राजकुलात् प्राप्तोऽस्ति। अस्ति कश्चित् राजदारिकायाः संदेशः।

**भासः** — (अप्रसन्नः) राजदारिकायाः संदेशः? भवतु। प्रवेश्यताम्। (चतुरिका निष्क्रान्ता।)

**सौमिल्लकः** — भवतु, वयस्य ! ममापि कार्यान्तरं वर्तते । तत् साधयामि । पुनर्मिलिष्यामः । (निष्क्रान्तः ।)

**शारद्वतः** — अहमपि स्वं नि ोगम् अशून्यं करोमि । (निष्क्रान्तः । ततः प्रविशति भटः ।)

**भटः** — आर्य ! वन्दे । आर्य, राजदारिका संदिशति, गतान् कियतोऽपि दिवसान् भवान् अध्यापनार्थं नागतः । ननु अहं प्रतिदिनं प्रतीक्षे । मा अद्य मे प्रतीक्षा विफला भवतु इति ।

**भासः** — भद्र ! तत्रभवतीं निवेदय, इतः परम् असमर्थोऽहम् अध्यापनार्थम् आगन्तुम् । तत् क्षन्तव्योऽयं जन इति (भटः संगीता च साश्चर्यं भासं प्रेक्षेते ।) अथवा तिष्ठ । अहं पत्रार्पितं कृत्वैव संदेशस्य उत्तरं ददामि । (लिखित्वा भटाय पत्रं ददाति ।)

**भटः** — (गृहीत्वा) ननु आर्य ...

**भासः** — किं वक्तुकामोऽसि ?

**भटः** — (विचार्य) न किमपि । (विस्मयमुखो निष्क्रान्तः ।)

**संगीता** — आर्यपुत्र ! किं न्विदम् ?

**भासः** — एवम् इदम् ।

**संगीता** — जानाम्यहम्, यत् न त्वम् अकारणम् एवं धाष्ट्यम् आचरेः । किं तु किमस्य फलं भवेत् । किं वा देवो मन्येत ? अचिरेणैव युद्धभूमेः स निवर्तेत इति श्रूयते ।

**भासः** — फलं तावत् यद् भावि, तद् भवतु । कदाचित् राजकोपः । स्थानभ्रंशः । वैभवहानिः ।... किं तु वरं वैभवहानिः, न तु चारित्र्यहानिः ।

**संगीता** — अत एव पूज्यसे, आर्यपुत्र !... अपि किंचित् पृच्छामि ?

**भासः** — अयि, कुतस् तवापि संकोचः ?

**संगीता** — नाहं त्वयि न विश्वसिमि । किं तु दुर्निवारं कुतूहलं मां मुखरयति । कथय । जातमेव किम् ?

**भासः** – कथं कथयामि ?... अथ वा, एष समासः । राजकन्या मत्सकाशात् न शिक्षाम् इच्छति; सा मम सांनिध्यम् इच्छति ।

**संगीता** — अतस् त्वया अयं निर्णयः कृतः ?

भासः — एवम् ।

संगीता — ( सावेगम् ) आर्यपुत्र ! ( कांश्चित् क्षणान् उभौ अन्योन्यं भावविह्वलम् अवलोकयन्तौ तिष्ठतः । ततः संगीता गत्वा भासस्य स्कन्धोपरि शिरो निदधाति । भासः तां शनकैः मस्तके परामृशति । द्वित्रैः क्षणैः चतुरिका प्रविशति, तौ च दृष्ट्वा अपसृत्य कासते । तौ पृथग्भवतः । )

चतुरिका — गुरुचरणाः द्वारदेशम् उपस्थिताः सन्ति ।

भासः — (ससंभ्रमम्) गुरुचरणाः ? ननु प्रवेश्यन्ताम् । अथ वा तिष्ठ, अहमेव आगच्छामि । (गत्वा उपाध्यायं ज्ञाननिधिम् अभिगच्छति । ततः प्रविशति उपाध्यायः । आयुः ६० प्रायम् ।) आगच्छन्तु गुरुचरणाः । आचार्य ! वन्दे । ( प्रणमति । )

उपाध्यायः — अव्याहत-प्रतिभो भव ।

संगीता — भगवन् ! वन्दे । (प्रणमति । )

उपाध्यायः — कल्याणमस्तु । वत्से ! सौभाग्यवती भव ।

भासः — आचार्य ! अलंक्रियताम् इदम् आसनम् ।

उपाध्यायः — वत्स ! नोपविशामि । नास्ति समयः । बहिः यानं प्रतीक्षते । ग्रामान्तरं प्रस्थितोऽस्मि । सप्ताहोत्तरं निवर्तिष्ये । कच्चित् कुशलम् ?

भासः — अद्य कुशलतरम् । आज्ञापयन्तु गुरुचरणाः । कुतोऽयम् अद्य अनुग्रहः ?

उपाध्यायः — त्वं कियतोऽपि कालात् निमन्त्रयसे । तव वैभवं सकृत् द्रष्टुं वाञ्छितम् आसीत् । अद्य निमिषमात्रमपि तावत् अवसरो लब्धः । ( इतस्ततो दृष्टिं विसृज्य ) साधु! प्रीतोऽस्मि । दिष्ट्या वर्धसे । एवमेव समृध्य ।

भासः — गुरुचरणानां प्रसादस्यैव इदं फलम् । तं तावत् अखण्डितम् इच्छामि ।

उपाध्यायः — अस्माकम् आशिषस् तावत् सन्त्येव । श्रुतम्, त्वया भारतं नाट्यीकृतम् इति । रामायणं च । साधु ! भविष्यति कदाचित् उत्सवावसरे दर्शनयोगः । सुष्ठु कृतं त्वया । जनः सदैव उपदेष्टव्यः— रामादिवत् वर्तितव्यम्, न रावणादिवत्, कर्णवद्वा ।

**भासः** — आचार्य ! नाटकं तावत् त्रैगुण्योद्भवस्य लोकचरितस्य रसानुकूलम् उपस्थापनम् । न तत्र साक्षात् उपदेशः ......

**उपाध्यायः** — व्यञ्जना तु भवति नु ? अत एव स उपदेशः कान्तासंमित इत्युच्यते । वत्से ! सत्यं नु ?

**संगीता** — (लज्जते ।)

**उपाध्यायः** — भगवन्तौ व्यास-वाल्मिकी तावत् त्रिकालदर्शिनौ महामुनी । वेदसंमितं पावित्र्यं तयोः अक्षराणाम् । त्वत्-सदृशः आस्तिकः कविरेव अत्र अधिकारवान् । अस्तु । आगमनेन प्रमोदः संजातः । अधुना तु प्रस्थातव्यम् ।

**भासः** — आचार्य ! किंचित् सेवित्वा गन्तव्यम् ।

**उपाध्यायः** — वत्स ! किमाग्रहेण ? संप्रति त्वराऽस्ति । पुनः संगमिष्यावहे एव ।

**भासः** — अयं ममापि मनोरथः । आर्ये ! एहि । द्वारदेशमपि यावत् गुरुचरणानाम् आनुयात्रं भविष्यावः ।

(निष्क्रान्ताः सर्वे ।)

(जवनिकापातः ।)

## तृतीयं दृश्यम् ।

(स्थानम् : राजप्रासादः । ततः प्रविशति आसनस्थः राजा राजसिंहः ।)

**राजा** — अन्ततः शत्रुः पराभूतः, पारसीमं च निष्कासितः । तथापि मन्ये नायमन्तः । अयं तावत् आरम्भः । पुनः कदापि उत्थाय सः पारसीमात् भारतम् आक्रमिष्यति । अन्यादृश एव अयं शत्रुः । बर्बराणाम् ओघमनु ओघः ! न चायं धर्मयुद्धानुसारेण जेतुं शक्यः । न वा एकार्धेन क्षुद्रेण नृपेण । अस्य अभिनवस्य भयस्य प्रतिकारार्थम् एकं राजमण्डलमिव, एकं भारतीयं साम्राज्यमिव आवश्यकम् । अयं विचारः शनैः शनैः राजलोके प्रसारणीयः । आस्तां तावत् । अत्र प्रतिनिवृत्तस्य मम चत्वारि दिनानि संजातानि । किं तु राजकार्याणाम् एवं नाम महान् राशिः संचितोऽस्ति, येन मनोविनोदनाय क्षणमपि अवसरः न लभ्यते । आशासे,

भासेन काऽपि नवीना नाट्यरचना कृता स्यात् । कदा तु तदर्थं समयो लभ्यः ।

( प्रविश्य )

**कञ्चुकी** — जयतु जयतु देवः । देव ! अमात्यो विज्ञापयति, अवलोकितमस्ति मया अद्यतनीयं राजकार्यम्, पत्रार्पितं च कृतमस्ति । अपि तद् अधुना प्रेषयामीति ।

**राजा** — (निःश्वस्य, स्वगतम्) राज्यं नाम अनिशम् अभोगः अभियोगः । (प्रकाशम्) जाजले ! ब्रूहि अमात्यम् । सिद्धोऽस्मि । प्रेष्यतामिति ।

**कञ्चुकी** — यद् देव आज्ञापयति । (निष्क्रम्य पुनः प्रविश्य) देव ! इदं कार्यजातम् । (पत्राणि अर्पयति ।)

**राजा** — (अवलोक्य) जाजले ! न हि अल्प-समयेन साध्यं कार्यमिदम् । तद् गत्वा स्वं नियोगम् अशून्यं कुरु । अहं त्वां पश्चात् शब्दापयिष्यामि ।

**कञ्चुकी** — यद् देव आज्ञापयति । (निष्क्रान्तः ।)

**राजा** — (एकैकशः पत्राणि अवलोकयन्, स्वगतम् ) किम् इदम्? उत्तमर्ण-अधमर्णयोर् विवादः । ऋणिकः ऋण-ग्रहणमेव नाङ्गीकुरुते । स धनिकम् असत्यवादिनं प्रतिपादयति । उभयोः साक्षात् आहूय प्रश्नकरणम् अमात्यः आवश्यकं मन्यते । अस्तु । इदम् ? चौर्यम् । मणिकारस्य गृहे चौर्यं कुर्वन् लोप्त्रेण गृहीतः चोरः । अमात्यः तस्य उभयोर् हस्तयोश् छेदनम् आदिशति । भवतु । इदम् अपरं किम् ? (किंचित् पठित्वा सहसा विस्मयोपहतः) किमिदम् ? भासम् उद्दिश्य आरोपपत्रम् ? (सकृत् अनुवाच्य पश्चात् उच्चैः पठति)– "स्वस्ति । श्रीमहाराजाधिराजः देवो राजसिंहः अनेन विज्ञापना-पत्रेण विज्ञाप्यते यथा राजकविना भासेन रामायणं महाभारतं च उपजीव्य नाटकानि प्रणीतानि सन्ति । एतेषु नाटकेषु सर्वत्र सत्यस्य अपलापः, इतिहासस्य च विपर्यासः कविना कृतोऽस्ति । एतानि नाटकानि रचयता अनेन भासेन यत्सत्यम् विटम्बनां नीते एते पवित्रे आर्ष-महाकाव्ये । तद् अस्मिन् वस्तुनि अवेक्ष्य यदि अपराधः सिद्धः स्यात् तर्हि यथोचितं दण्डं धारयितुम् अर्हति देवः । यदि

अपराधो न सिध्येत्, तर्हि यं कमपि दण्डं भोक्तुम् अहं सिद्धोऽस्मि इति विज्ञापना रैभ्यसगोत्रस्य वसुमित्रस्य।" (निश्वस्य) अमात्येन आवयोः सौहृदं जानतेव कमपि स्वम् अभिप्रायम् अलिखित्वा निर्णयार्थं मामेव प्रेषितमस्ति इदं प्रकरणम्। किं करोमि? (विचारयन् गतागतं करोति।) अपि अत्र तथ्यं स्यात्? उत इदम् अलक्षितमेव करोमि? किं भास एव एतान् दिवसान् कमपि अन्यथाभावं गतोऽस्ति? अत्र प्रतिनिवृत्तमात्रं माम् आगत्य विजया व्यज्ञापयत्, यत् तथा नाम भासः उद्धतः संवृत्तोऽस्ति, यथा माम् अध्यापयितुमपि नागच्छति। मया तावत् राजपुत्र्याः अयं कोऽपि मिथ्या अन्यथाग्रहः स्यात् इति कृत्वा तद् उपेक्षितम्। ततः पूर्वमपि पारितोषिकप्रदानवेलायां देवरातेन आगत्य निवेदितम् आसीत्, यथा कीर्तिलाभेन मदमत्तो भासः महाराजमपि न गणयति इति। तदानीमपि किमपि असूयामूलकमिदं देवरातस्य भाषितं स्यादिति बुद्धया न मया तत् विगणितम्। अधुना च अयं प्रकारः। किं नु खलु सत्यं स्यात्? (पुनरपि गतागतं प्रारभते। ततः प्रविशति कञ्चुकी।)

**कञ्चुकी** — जयतु जयतु देवः। द्वारि आस्थानपण्डितो देवरातः उपस्थितोऽस्ति। श्रुत्वा देवः प्रमाणम्।

**राजा** — अत्र तावत् महान् कार्यशेषो वर्तते। कथं वा समयो लभ्यः? (विचिन्त्य) अथ वा, आगच्छतु। प्रवेश्यतां सः।

**कञ्चुकी** — यद् आज्ञापयति देवः। (निष्क्रान्तः। ततः प्रविशति देवरातः।)

**देवरातः** — विजयतां देवः।

**राजा** — स्वागतम्, पण्डितराज! आस्यताम्।

**देवरातः** — तत्रभवत्याः राजदारिकायाः शिक्षां समाप्य प्रस्थितोऽस्मि। अद्य पञ्चमो दिवसः देवस्य समराङ्गणात् प्रतिनिवृत्तस्य। चिन्तितम्, एतद्विजयनिमित्तं देवं सभाजयामि। दिष्टया वर्धते देवो विजयेन।

**राजा** — अनुगृहीतोऽस्मि।

**देवरातः** — अधुना तावत् विश्रामं लभतां देवः। कच्चित् समर-व्यापारः निःशेषं समाप्तः ?

**राजा** — कुतः समाप्येत ? अयं तावत् आरम्भः। आस्तां तावत्। कथं बिजया ? कच्चित् न उपदेशग्रहणे भवन्तम् आयासयति ?

**देवरातः** — शान्तं पापम् ! ननु दुष्करः एतादृशछात्रलाभः। अथ वा सुष्ठु उच्यते — 'यथा खनिः, तथा मणिः।'

**राजा** — (तद् अनाकर्ण्यैव) पण्डितराज ! एकस्मिन् वस्तुनि भवतो मतं जिज्ञासे। भासगामि तत्।

**देवरातः** — (स्वगतम्) भासगामि ! किं तदेव स्यात् ? साव-धानेन भवितव्यम्। (प्रकाशम्) आज्ञापयतु देवः।

**राजा** — (पत्रं प्रदाय) पठ्यताम् इदम्।

**देवरातः** — (दृष्ट्वा, स्वगतम्) साधु ! प्राप्तं तर्हि वसुमित्रस्य पत्रम् अत्र। (प्रकाशम्) देव ! ननु कविराजस्य भासस्य प्रतिस्पर्धी अयं वसुमित्रः। स तावत् असूयावशात् यत् किमपि लिखेत्। न तत्र किमपि अवधानं दातुम् अर्हति देवः।

**राजा** — अस्माकमपि तावत् तथैव मतिः। किं तु पत्रार्पितः अभियोगः नैवम् उपेक्षितुं शक्यते।

**देवरातः**— अहो न्यायापेक्षिता देवस्य ! (स्वगतम्) एष समयः। (प्रकाशम्) देव, यदि एवं क्रियेत ?

**राजा** — कथम् ?

**देवरातः** — कविराजेन लिखितानि नाटकानि अत्र आनाययि-तव्यानि। देवस् तावत् स्वयं प्रभुः नाटकपरीक्षणस्य। शलाकान्यायेन द्वित्राणि नाटकानि अवलोकयतु देवः। यदि पूर्वपक्षीकरणार्थम् अपि दोषसाधकं किंचित् प्रमाणं लब्धम्, अग्रतो गत्वा सर्वलोकसमक्षां परीक्षाम् आज्ञापयतु। विपर्यये तु (आरोपपत्रं निर्दिश्य) अस्य निरर्थक-करण्डके विसर्जनम् अवस्थितमेव।

**राजा** — साधु उपदिष्टं भवता। किं तु एकाकिनो निर्णयः संभव-द्दोषः। तत् भवता अस्यां प्राथमिक्यां परीक्षायां मम साहाय्यम् आचरितव्यम्।

देवरातः — (स्वगतम्) इदं तावत् इष्टमैव वैद्येन पथ्यीकृतम्। (प्रकाशम्) यदि देवस्यैव तथा इच्छा, सिद्धोऽस्मि सेवार्थम्।

राजा — साधु। गच्छतु भवान् इदानीम्। पश्चात् यथाकालम् आकारयिष्यामि।

देवरातः — यथाज्ञापयति देवः। (स्वगतम्) अनुकूलं तर्हि इदानीं दैवम्। अहह! भास! अनुभव इदानीं मदावलेपकृतस्य मम अवधीरणस्य फलम्। (निष्क्रान्तः।)

राजा — (पुनरपि पत्रजातम् आदाय) हन्त भोः। न केवलम् अभोगः राज्ययोगः, अनवेक्षितमैत्रीकोऽपि। (कार्यमग्नो भवति।)

(जवनिकाक्षेपः।)

## चतुर्थं दृश्यम्।

(स्थानम् — भासगृहम्। ततः प्रविशति आसनस्थो भासः।)

भासः — शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥ १

भीष्मद्रोणतटां जयद्रथजलां गान्धारराजह्रदां
कर्णद्रौणिकृपोर्मिनक्रमकरां दुर्योधनस्रोतसम्।
तीर्णः शत्रुनदीं शरासिसिकतां येन प्लवेनार्जुनः
शत्रूणां तरणेषु वः स भगवानस्तु प्लवः केशवः॥ २

(प्रविश्य)

संगीता — इयं भवतः ऊरुभङ्ग-नाटकस्य प्रतिलिपिः। अधुनैव समाप्ता। (अर्पयति।)

भासः — (दृष्ट्वा) अहो मौक्तिकसरसुन्दरम् अक्षरम्! कियन्नु सरलम्! ... ... तव हृदयमिव।

संगीता — (हसन्ती) अलं स्तुत्या। एतावानेव मे विभवः।

भासः — इदम् अन्तिमं पर्व। एकं महानाटकं समाप्तम्। महाभारत-संज्ञकम् एकं भीषणं नाटकम् अवसितम्।

**संगीता** — यदा तावत् मया इदम् ऊरुभङ्गं पठितम्, तदा किं किं नु प्रतीतम्, असमर्थाऽस्मि इदं वक्तुम्। किमपि अपरिचितम्, किमपि अनभ्यस्तम्। आस्वाद्यमानमपि शब्दासहम्। यथा सिद्धकण्ठस्य गायकस्य कश्चित् अनाहतो रागः।

**भासः** — धाष्टर्यमेव मया किंचित् अत्र आचरितम् अस्ति। मरणान्तं नाटकम्! रङ्गभूमौ अकृतपूर्वम्!

**संगीता** — अस्य पठनम् एकतः औदास्यकरम्; कामपि पर्युत्सुकताम् आवहति। अन्यतश्च किमपि गूढानन्दकरम्।

**भासः** — मृत्युः! कियत् भीषणोदात्तं वस्तु। विशेषतश्च महतः पुरुषस्य मृत्युः। भवतु नाम महतः खलपुरुषस्यापि। कियान् नाट्यगर्भः। न जाने कुतोऽस्माकं नाट्यशास्त्रकारैः तस्य रङ्गमञ्चे निषेधः कृतोऽस्ति।

**संगीता** — अत्र नाटके एकतः पृष्ठभित्तिभूता सा भयंकरी रणभूमिः। हतविहत-असंख्यातयोधजनित - उच्छलित - बहलरुधिरनदीप्रवाहा शस्त्रास्त्रसंघट्ट-प्रवर्धित-महावीरमुखविनिर्गतसिंहनादा श्रूयमाणमर्माहत-वीरपुरुषप्रमुक्तकूजिता पिशितग्रासलालसगृध्रशिवादिपिशिताशनकृष्यमाणवीरकलेवरा। अन्यतश्च तत्पुरतः अभिनीयमानम् इदं भव्योदात्तं नाटकम्: अयं भूतपूर्वः एकादशाक्षौहिणीभर्ता, संप्रति भग्नोरुः, असहायः, धूलिपतितश्च दुर्योधनः। अहो वैशाल्यं कल्पनायाः!

**भासः** — कल्पनाप्राभवं हि नाट्यमर्म।

**संगीता** — यः पुरा गजाधिरूढः, अनुचरपुरःसरैश्च परिवृत एव महता वैभवेन इतस्ततः संचरितः स्यात्, स राजाधिराज इदानीं भग्नोरुत्वात् पद्भ्यां संचरितुमपि असमर्थोऽस्ति। रणभूमौ बालवत् जानुसंचरणं तस्य आश्रयितव्यं भवति। परिजनैः परित्यक्तश्च सः तदानीं स्वयम् अन्धेन धृतराष्ट्रेण असूर्यंपश्याभ्यां च राजदाराभ्याम् 'अपि अयम् अत्र स्यात्' 'अपि अयम् अत्र स्यात्' इति रणाङ्गणम् आगत्य अन्वेष्टव्यो भवति, बालश्च दुर्योधनपुत्रः दुर्जयः तेषां मार्गदर्शनं करोति — सर्वथा अपूर्वोऽयं कल्पनाविलासः। मन्ये एकमपि इदं नाटकं भवते 'नाटकचक्रवर्ति'-पदप्रदानार्थम् अलम्।

**भासः** — प्रिये! उपाधिलाभेन न तथा कवेः मनसः संतोषः यथा...

**संगीता** — यथा इष्टजनकृतेन तत्कृतेः गुणग्रहणेन । एवं नु ? आर्यपुत्र ! अत एवाहम् एवं वाचालतां नीताऽस्मि । . . . इदमपि एकम् अत्र नाटके अवधारणीयम् : दुर्योधनस्य ऊरुभङ्गः खलु तम् इदानीमहं पद्भ्यां संचरितुम् असमर्थः इति हेतोः न तथा व्यथयति, यथा अङ्काश्रयप्रणयी मम दुर्जयः इदानीम् आत्मनः जन्मसिद्धम् इदम् आसनम् आरोढुम् असमर्थः इति हेतोः । अहं तावत् इदं पठित्वा रुद्धकण्ठेव संवृत्ता ।

**भासः** — पुरुषमात्रः सुलभापत्यस्नेहः । कथमिव दुर्योधनोऽपि अत्र अपवादतां व्रजेत् ?

**संगीता** — एतदवस्थागतस्य तस्य मातृभक्तिरपि प्रसभं हृदयाकर्षिणी । 'अन्यस्यामपि जात्यां मे त्वमेव जननी भव' इति स ताम् अन्तिमं प्रार्थयते । अहो गूढः मनुष्यस्वभावः ।

**भासः** — भवतु । सर्वः स्वजनदोषान्धः । तथापि दोषमपि कथय, येन प्रतिविधीयेत ।

**संगीता** — दोषः इति वक्तुं न शक्नोमि । किं तु दुर्योधनस्य हृदयपरिवर्तनम् अश्रद्धेयमिव भाति । तथा नाम उन्मत्तो भूत्वा अन्ते स एव दयालुः, सविमर्शः, निर्वैरश्च संपद्यते, मातापित्रोः निस्सीमो भक्तो भवति, पाण्डवान् शुश्रूषितुं द्रौपदीं च मातृवत् पूजयितुं स दुर्जयम् उपदिशति – इदं तु विश्वसितुं कठिनमेव ।

**भासः** — सुष्ठु उक्तम् । किं तु चिन्तय । मरणकाले प्रत्यासन्ने मनुष्यः स्वभावत एव अन्तर्मुखो भवति । तस्य सुप्ताः सद्गुणाः तदानीम् उद्बुध्यन्ति । वैरबुद्धिः गलति । कालगुण एवायम् । अतो दुर्योधनस्य हृदयपरिवर्तने न अतीव आश्चर्यं कर्तव्यम् । किं च, मानशरीरा राजानः इति तस्य श्रद्धा आसीत्, मानार्थमेव तेन युद्धं कृतम्, अन्ततश्च 'येनैव मानेन समं प्रसूतः, तेनैव मानेन' सह स दिवं प्रयातः । संगीते ! अहं दुर्जनेऽपि वर्तमानं सद्गुणं पश्यामि । यथा मया कैकेय्यां दृष्टः । कर्णेऽपि दृष्टः ।

**संगीता** — आ जन्मनः दुराचारः अयं दुर्योधनः अन्तकाले प्रकटितमाहात्म्यः 'को नु स्वन्ततरो मया' इति वदन् उन्नतेन शिरसा मृत्युम् अभिगच्छति । कामपि अविनाशिनीं मुद्रां हृत्पटले उत्पाद्य स

नेपथ्ये तिरोभवति। आर्यपुत्र! नूनं भासोपज्ञं दुःखान्तनाटकम् इति भरतखण्डे आर्यपुत्रस्य कीर्तिः अजरामरा स्थास्यति।

**भासः** — तत् तावत् भगवान् कालपुरुष एव निर्णेष्यति। (सपरिहासम्) तथापि मन्ये ईदृशात् सुन्दरात् मुखात् विनिर्गता इयं वाणी न वितथा भविष्यति। (पुनरपि गाम्भीर्येण) तद् यथा तथा भवतु। इदं तु सत्यम्, यद् अद्य कामपि कृतार्थताम् अनुभवामि। अद्य मे कृतकृत्य इव आत्मा प्रतिभाति। यत् संकल्पितम् आसीत्, तद् वस्तुभूमिम् अवतीर्णम्। रामायणमहाभारताभ्यां मया यथान्तःस्फूर्ति नाटचरूपं समर्पितम्। अद्य कामपि अननुभूतां लघुताम् अनुभवामि, कमपि अननुभूतं चित्तप्रसादम्।

**संगीता** — दिष्टचा सकरुणा ईश्वराः। न हि सर्वेषामेव एवं संकल्पसिद्धिः भाग्यलिखिताऽस्ति। आस्ताम्। एकम् अन्तःस्फुरणं नाथेन साकारीकृतम्। अधुना किम्?

**भासः** — (स्मयमानः) साधु पृष्टम्। तदपि शनैः शनैः आरब्धमस्ति आविर्भवितुम्।

**संगीता** — किं नु खलु तत्?

**भासः** — एतज्जन्मप्रयोजनं संपूर्णमस्ति। शाश्वतं जीवनप्रयोजनम् अधुना चिन्तनीयम्।

**संगीता** — (प्रश्नमुखी तम् अवलोकयति।)

**भासः** — तस्य जगत्सूत्रधारस्य प्रसादं लब्ध्वा आत्यन्तिकी दुःखमुक्तिः। तदर्थं तस्य गुणानुवादकीर्तनम्। कदा नु खलु अहम्—

**तं नन्दनन्दनममन्दसुखस्य कन्दं**
**कुञ्जेषु गुञ्जनकरीं मुरलीं दधानम्।**
**गोपीविटं शिशुनटं नवमेघशोभं**
**संसारसिन्धुतरणं शरणं प्रपद्ये॥**

**संगीता** — हन्त! इदमेव नु! अस्ति तर्हि अद्यापि भूयान् कालः इमां वार्धकीयां मुनिवृत्तिम् आश्रयितुम्।

**भासः** — मा मैवं मंस्थाः। 'लिखति दिवसं यातं यातं यमः किल कामिनि।' अ एव कौमारे एव आचरणीयान् भागवतान् धर्मान्

आचक्षते। अथ वा, इदं तावद् क्षणम् आस्ताम्। इदम् अन्यत्तु मया निर्णीतमेव।

**संगीता** — किमिदम् अन्यत् ?

**भासः** — आगामिन्यां स्पर्धायां नाहं संमिलिष्यामि। (संगीता तं सदुःखं प्रेक्षते।) संप्रति लाभालाभौ, ईर्ष्यामत्सरौ, स्पर्धाप्रतियोगिते – इदं सर्वं शिशुक्रीडायितुं प्रारब्धमस्ति। अन्येषु दुःखेन दन्दह्यमानेषु को नाम विजयानन्दः ? अधुना अन्ये तावत् पारितोषिकानन्दम् अनुभवन्तु।

**संगीता** --(स्वगतम्) इदं तावत् कदाचित् आशङ्कितमेव मया। (प्रकाशम्) आर्यपुत्र ! मम तावत् श्रोतव्यम्। नाहं युष्माकं परिपन्थिनी। इदं तु मम वचनं कर्तव्यम्। केवलम् अस्मिन् वर्षे स्पर्धायां संमिलितव्यम्। यदि विजयी भवान्, तर्हि नाटकचक्रवर्तिपदं लप्स्यते। तत उत्तरं कामं निवर्तितव्यम्।

**भासः** – (हसन्) इदं तद्, कान्तासंमिततया उपदेशः इति यद् उच्यते।

**संगीता** — (अपरित्यक्त-स्वमतप्रतिपादना) देवस्यापि कियती नु आस्था आर्यपुत्रस्य नाटकेषु। समराङ्गणात् प्रतिनिवृत्तमात्रेण तेन तानि संदिश्य नीतानि। अचिरमेव देवः स्वीयं संतोषं निवेदयितुं भवन्तं निमन्त्रयिष्यते अपि। (ततः प्रविशति शारद्वतः।)

**शारद्वतः** — एष राजकुलात् राजसंदेशम् आदाय भटोऽस्ति संप्राप्तः।

**संगीता** — (सानन्दम्) आगतोऽपि ?

**भासः** — (निर्विकारम्) प्रवेश्यताम्। (शारद्वतः निष्क्रान्तः। ततः प्रविशति भटः।)

**भटः** — आर्य, वन्दे। आर्यस्य कृते महाराजस्य आज्ञापत्रं वर्तते।

**भासः** — महाराजस्य आज्ञापत्रम् ? (गृहीत्वा तत् शिरसा वन्दते।)

**भटः** — भवतु। साधयामि। (निष्क्रान्तः। भासः उद्घाट्य पठितुं प्रारभते। संगीता सोत्सुका तस्य पार्श्वमेत्य स्कन्धलग्ना समकालं पठति।)

**भासः** — (सहसा) किमिदं पठामि ? (अनुवाच्य पश्चात् उच्चैः

पठति ।) " राजकविः भासः अनेन लेखेन आज्ञाप्यते, यथा, रामायण-महाभारतविषयकेषु नाटकेषु भासेन एतयोर् महाकाव्ययोः विटम्बना कृता अस्ति इति आरोपपत्रं राज्ञा प्राप्तमस्ति । अस्य आरोपस्य सर्वजनसमक्षा परीक्षा श्वः अपराह्णे राजकुले भविता । तदानीम् आक्षेपप्रतिवचनार्थं स्वपक्षसमर्थनार्थं च राजकविना तत्र उपस्थातव्यम् इति आज्ञापना — महाराजाधिराजस्य राजसिंहस्य । " ... आः ! क एष राजा नाम अस्मन्नाटकपरीक्षणे ? ( विचिन्त्य ) अथ वा आवेगवशात् एवम् अनुचिता वाणी निर्गता । तथापि... तथापि...

**संगीता** — आर्यपुत्र ! अलम् उद्वेगेन । आरोपपरीक्षा खलु । न नाटकपरीक्षा ।

**भासः** — एकार्थमेव तत् ।

**संगीता** — एतदर्थं देवेन नाटकानि नीतानि ? मया पुनः चिन्तितम्... । केन खलु एवम् आरोपितं स्यात् ? नूनं वसुमित्रस्यैव इदम् अनार्यं कर्म । ननु तदानीम् अहं भणन्ती आसम् ...

**भासः** — यस्य कस्यापि भवतु । इदानीं किल तत् गौणम् । देवस् तावत् निजं राजधर्मम् आचरति ।

(नेपथ्ये घोषणा — " भोः भोः पौराः ! शृणुत तावत् । राजकवेः भासस्य उपरि कृतस्य रामायण-महाभारतदूषणस्य सर्वजनसमक्षा परीक्षा श्वः अपराह्णे राजकुले भविता । तर्हि यस्य अत्र विषये किमपि अनुकूलं प्रतिकूलं वा वक्तव्यं स्यात्, स तत्र उपतिष्ठताऽऽऽऽम् । " डिण्डिमनादः ।)

**भासः** — मयापि नाम इदं श्रोतव्यम् ! ममापि नाटकानां सार्वजनीना परीक्षा ! अथ वा भवतु तावत्, यदि तादृशी भवितव्यता । न हि अग्नि-परीक्षां विना सुवर्णस्य शुद्धिः सिध्यति । ( विचारमग्नः गम्भीरस् तिष्ठति ।)

**संगीता** — शारद्वत ! शारद्वत ! ( स प्रविशति । ) शारद्वत ! आर्यसौमिल्लकं गच्छ । ब्रूहि, शीघ्रम् आगच्छेति । ( स 'तथा' इत्युक्त्वा निष्क्रान्तः । शारदायाः चित्रम् अभिमुखीभूय ) अम्ब ! त्वमेव इदानीं शरणम् । (जवनिकापातः ।)

इति द्वितीयोऽङ्कः ।

# तृतीयोऽङ्कः ।

[स्थानम् :— राजप्रासादः । न्यायसभा संमिलिताऽस्ति । एकस्मिन् पटले पुस्तकराशिः । श्रेष्ठिकायस्थादिकं न्यायमण्डलं स्थानापन्नं विद्यते । अमात्यः, देवरातः, वसुमित्रः, ज्ञाननिधिश्च इत्येतेऽपि स्थानापन्नाः सन्ति । तथैव केचन पौराः अपि । कानिचित् स्थानानि रिक्तानि सन्ति । वसुमित्रदेवरातौ मध्ये मध्ये किमपि कर्णान्तिकं संभाषेते ।]

**प्रथमः पौरः** — (जनान्तिकम्) अहो कालातिपातः! कदा नु खलु प्रारम्भो भविष्यति ?

**द्वितीयः पौरः** — भविष्यति । किं त्वरया ? वयं तावत् नवं नाटकमिव द्रष्टुं कुतूहल-प्रेरिताः प्रागेव आगताः । महान्तस्तु समये एव आगच्छन्ति ।

**तृतीयः पौरः** — युक्तम् उक्तम् । न ते वयमिव निरुद्योगाः ।

**प्रथमः पौरः** — (नेपथ्ये दृष्ट्वा) पश्यत । एष राजकविः आयाति ।

**द्वितीयः पौरः** — कथम् ! अद्य पद्भ्यामेव । क्व शिबिका ?

**तृतीयः** — किं प्रागेव भ्रष्टा ?

**प्रथमः** — हताश ! ननु शुभं वद । (ततः प्रविशति सौमिल्लक-शारद्वताभ्याम् अनुगम्यमानो भासः । अद्य केचन अल्पीयांस एव तस्य स्वागतोत्सुकाः । भूयांसः उदासीनाः । भासादयः स्थानपरिग्रहं कुर्वन्ति । मध्ये भासः, उभयतः सौमिल्लक-शारद्वतौ ।)

**सौमिल्लकः** — (जनान्तिकम्) वयस्य ! अपि एकाकिनो वसुमित्रस्य अयं प्रयोगः स्यात् ?

**भासः** — अचिरमेव व्यक्तिर् भविष्यति ।

**शारद्वतः** — आचार्य ! अपि आदित एव वितण्डाताण्डवं कृत्वा सर्वम् आकुलीकुर्याम् ?

**भासः** — शान्तं पापम् ! 'सभां वा न प्रवेष्टव्यं वक्तव्यं वा समञ्जसम् ।'

**शारद्वतः** — किं तु समञ्जसेन वचनेन सभायां विजयः लभ्येतैव, इति न । अन्यदेव सभाविजयशास्त्रम् ।

**भासः** — ननु न्याय्येन मार्गेण स्वपक्षं समर्थयितुकामा वयम्, न यथातथा विजयकामुकाः।

**शारद्वतः** — तथापि शठं प्रति . . . (नेपथ्ये घोषणा : "एष प्रविशति दिनकरकुलप्रसूतिः, प्रतियोद्धृभयंकरः, गोब्राह्मणप्रतिपालकः, सरस्वतीकण्ठाभरणः, दिगन्तविश्रान्तकीर्तिः, सागराम्बरवसुंधरैकपतिः, नृपतिसार्वभौमः, महाराजाधिराजो राजसिंहः। साऽऽवधानम्। साऽऽवधानम्।" सर्वे उत्थाय अभिवादयन्ति। राजा प्रणामस्वीकारपूर्वकं स्वासनम् आरोहति। तदनु सभ्याः उपविशन्ति।)

**अमात्यः** — अपि श्रेष्ठिकायस्थादिकं न्यायमण्डलम् उपस्थितम् अस्ति?

**श्रेष्ठि-कायस्थौ** — एते स्मः।

**अमात्यः** — अपि वादी रैभ्यसगोत्रः वसुमित्रः उपस्थितोऽस्ति?

**वसुमित्रः** — एषोऽस्मि भोः।

**अमात्यः** — अपि प्रतिवादी राजकविर् भासः उपस्थितोऽस्ति?

**भासः** — एषोऽस्मि उपस्थितः, भो आर्य।

**अमात्यः** — साधु। (न्यायमण्डलम् उद्दिश्य) प्रस्तूयतां भोः।

**राजा** — तिष्ठ। भोः सभ्याः! यदा वयं न्यायसभायाम् उपतिष्ठामः, तदा तावत् वयमेव न्यायाध्यक्षपदम् अधितिष्ठामः। अद्य तु वयं केवलं प्रेक्षकत्वेनैव अत्र उपस्थातुम् इच्छामः। तद् अन्यः कोऽपि न्यायाध्यक्षपदम् अलंकरोतु। (प्रथमः पौरः 'किं न्विदम्' इत्यर्थकं मुखाविर्भावं करोति। द्वितीयः 'को नु वेदम्' इत्यर्थकं स्कन्धक्षेपम्।)

**भासः** — (स्वगतम्) प्रसिद्धम् आवयोः सौहृदम्। नूनं पक्षपातदोषं परिहर्तुम् इच्छति देवः।

**देवरातः** — अपि अहं सूचयामि?

**राजा** — कामम्। को दोषः?

**देवरातः** — उपाध्यायो ज्ञाननिधिः वयसा तपसा ज्ञानेन च सर्वथा अर्हति न्यायाध्यक्षपदम् आरोढुम्।

**वसुमित्रः** — (जनान्तिकम्) हा धिक्! किं त्वया कृतम्? ननु भासस्य गुरुरेषः।

**देवरातः** — तूष्णीम् आस्स्व। ननु अहं वेद्मि।

(वसुमित्रः स्वस्थाने अस्वस्थः आस्ते।)

**भासः** — (स्वगतम्) किं नु खलु अनेन उपक्षिप्तम्?

**ज्ञाननिधिः** — देव! ननु सर्वजनविदितम् इदम्, यद् भासो मम शिष्यः। अद्य च सः अभियुक्तः। तत् कथम् अहम् अस्मिन् व्यवहारे न्यायाध्यक्षपदम् अधिष्ठातुं शक्नुयाम्? कदाचित् जनो मां पक्षपातिनं मन्येत।

**राजा** — मैवं शङ्किष्ठाः। वयं सर्वे उपाध्याये विश्वसिमः। (सभाम् उद्दिश्य) अपि सर्वस्य अनुमतम्? (विरोधार्थम् उत्तिष्ठन्तं वसुमित्रं देवरातः हस्ते गृहीत्वा नियमयति।) अनुमतं तर्हि सर्वेषाम्। (ज्ञाननिधिं प्रति) अलंक्रियतां तर्हि न्यायासनम्।

**ज्ञाननिधिः** — का गतिः? (आसनम् अध्यास्ते।) अद्यतनीयो व्यवहारः कश्चित् अन्यादृश एव। कश्चित् अपूर्व एव। भगवता मनुना अष्टादशसु मार्गेषु कार्याणि निबद्धानि। किं तु तत्र अविद्यमानः कश्चित् एकोनविंशतितमः नवीन एवायं व्यवहारः। अस्य व्यवहारस्य एवम् अभूतपूर्वत्वात् नात्र नित्या न्यायसरणिः याथातथ्येन अनुसर्तुं शक्या। तथापि साक्ष्यादि-प्रमाण-परीक्षणस्य, सत्यान्वेषणस्य, निर्णयकरणस्य च ये सामान्येन मार्गाः सन्ति, ते तावत् नैव वर्जयिष्यन्ते। आस्ताम्। अत्र व्यवहारे वसुमित्रेण राजकविं भासम् उद्दिश्य तस्य नाटकविषये केचन दोषारोपाः कृताः सन्ति। अतः वसुमित्रः आदौ आरोपस्थापनं करोतु।

**वसुमित्रः** — सभ्याः! राजकविः भासस् तावत् सर्वजनविदित एव। तस्य नाटकानि नैकदा प्रयुक्तानि सन्ति। बहुभिः तानि दृष्टानि सन्ति। मयापि तानि दृष्टानि सन्ति। अन्येभ्य इव मह्यमपि रोचन्ते। विशेषतश्च तस्य स्वप्नवासवदत्तम् अहं केवलम् अप्रतिमानं मन्ये। किं तु एवं तन्नाटकानुरागिणा सताऽपि मया केवलं जनहितम् अवेक्षमाणेन, महता दुःखेन, अयम् अभियोगः क्रियते। (देवरातः 'साधु!' इत्यर्थिकां शिरश्चालनसंज्ञां करोति।)

यदि नाम अयं कविताकामिनीहासो भासः तादृशान्येव नाटकानि अरचयिष्यत्! अन्यदेव तु विधिलिखितम् आसीत्। रामायण-महाभारते

उपजीव्य नाट्यलेखनं भासेन चिन्तितम् । कतिचनमासेभ्यः पूर्वम् अत्र यो गौरवोपाधिसमर्पणसमारोहः समपद्यत, तस्मिन्नेव अवसरे भासेन इदम् उद्घोषितम् । तदानीं येऽत्र उपस्थिता आसन्, ते इदं स्मरेयुरेव। एवं संकल्प्य भासेन यानि नाटकानि लिखितानि, तानि तस्य गृहात् आनीय (पटलं प्रति अङ्गुलिनिर्देशं कृत्वा) अत्र स्थापितानि सन्ति। रामायण-महा...

**न्यायाध्यक्षः** — तिष्ठ । (भासं प्रति) अपि प्रतिवादिना इदम् अङ्गीक्रियते, यदेतानि ममैव नाटकानीति ?

**भासः** — ओम् । अङ्गीकृतम् ।

**न्यायाध्यक्षः** — भवतु तर्हि । (वसुमित्रं प्रति) गच्छाग्रतः ।

**वसुमित्रः** — रामायण-महाभारतविषयकाणि नाटकानि । शोभनः कल्पः । किं तु एतादृशनाट्यलेखने यः संयमः आवश्यक आसीत्, यत् पथ्यपालनम् आवश्यकम् आसीत्, तद् भासेन न कृतम् । अतः यत्सत्यम्, एतयोः पुण्ययोर् आर्षमहाकाव्ययोः विटम्बनैव भासेन कृता इति अहं स्पष्टं ब्रवीमि । मम आरोपस्य अनुकूलानि प्रमाणानि अहम् अनुपदमेव प्रदास्यामि । किं तु तत्पूर्वम् एकद्वौ विषयौ केवलम् आनुषङ्गिकतया स्पृशामि ।

यस्य कस्यापि कवेः अधिकारसंपत्तौ व्युत्पत्तिर् नाम काचिद् अस्ति । प्रायः सा शास्त्राध्ययनमूलिका । भासेन अन्यानि शास्त्राणि पठितानि वा, न वा, नाहं वेद्मि । किं तु सर्वशास्त्रोपकारकं पाणिनीयं तेन न पठितम्, पठितमपि वा अनादृतम्, इति निश्चितोऽस्मि । तस्य नाटकानां पृष्ठे पृष्ठे वर्तमानाः अपाणिनीयाः शब्दा एव अत्र प्रमाणम् । यथा व्याकरणम् तथा नाट्यशास्त्रमपि...

**शारद्वतः** — (न्यायाध्यक्षं प्रति) आर्य ! किं युक्तम् इदं व्याकरणप्रमादस्य एकमपि उदाहरणम् अदत्त्वा केवलं दूषणदानम् ?

**वसुमित्रः** — अपेहि रे बटो ! गृहं गच्छ । विष्टिकादण्डेन क्रीड । किं तवानेन अत्र ?

**शारद्वतः** — ननु भोः ! किं शेषं कोपेन पूरयति भवान् ?

**न्यायाध्यक्षः** — बटोः प्रश्नः समुचितोऽस्ति । वादी उदाहरणानि निर्दिशतु ।

**वसुमित्रः** — ननु एष ददामि। (पटलात् एकं पुस्तकं गृहीत्वा उद्घाटयति। कानिचित् पत्राणि परिवर्त्य) ... इदम् : 'आपृच्छामि।' दृश्यतां पदव्यत्ययः। ... अत्र : 'परिष्वजति।' पुनरपि पदव्यत्ययः। ... इदम् : 'धरते।' दृष्टः विकरणव्यत्ययः? ... 'महार्णवाभे युधि।' अस्ति अत्र विशेषण-विशेष्ययोः लिङ्गसंगतिः? ... 'सीता मां न रमते।' किं भोः, रमिः सकर्मकः? ... अत्र : 'सर्वराज्ञः।' अयं महान् नाटककारः समासान्तं टचमपि न जानाति। ... अत्र...

**भासः** — अलं विस्तरेण। अङ्गीक्रियन्ते मया एते प्रयोगाः।

**वसुमित्रः** — श्रुतं भोः? अङ्गीकृतम् अनेन व्याकरणाज्ञानम्।

**शारद्वतः** — (जनान्तिकम्) आचार्य! अप्यहम् अस्य प्रतिवचनं दद्याम्?

**भासः** — छन्दतः।

**शारद्वतः** — अहमस्य प्रतिवचनं ददामि। न एतादृशाः प्रयोगाः अज्ञानमूलकाः।

**वसुमित्रः** — न अज्ञानमूलकाः? (सोल्लुण्ठनम्) किं तर्हि विज्ञानमूलकाः? (सभायां हासः।)

**न्यायाध्यक्षः** — शान्तम्! शान्तम्!

**शारद्वतः** — ननु आचार्येण ...

**न्यायाध्यक्षः** — आचार्येण ?

**शारद्वतः** — नाम प्रतिवादिना श्रीभासेन।

**न्यायाध्यक्षः** — भवतु। गच्छाग्रतः।

**शारद्वतः** — आचार्येण असकृत् एते महाकाव्ये पठिते स्तः। ते आचार्यस्य रक्तगते इव। अतः स्वभावत एव तादृशाः आर्षप्रयोगाः आचार्यस्य मुखात् निःसरन्ति। किं महाभारते पृष्ठे पृष्ठे एतादृशाः प्रयोगाः न दृश्यन्ते? ननु इयमेव भारती रीतिः। (पौरमुखेषु 'साधु!' इति भावः।)

**भासः** — अन्यदेकम्। महाभारतीय-वातावरणस्य निर्मितिरपि अनेन प्रकारेण अभिप्रेता।

**न्यायाध्यक्षः** — भोः श्रेष्ठिकायस्थौ! अपि सर्वाणि व्यवहार-पदानि लिख्यन्ते?

**श्रेष्ठिकायस्थौ** — आर्य ! लिख्यन्ते ।

**न्यायाध्यक्षः** — साधु । (वसुमित्रं प्रति) गच्छाग्रतः :

**वसुमित्रः** — (घर्मं प्रमृजन्) किं नु खलु अहं विवक्षुः आसम् ?

**प्रथमः पौरः** — (जनान्तिकम्) धिक् ! एतावत्येव गलितः ।

**द्वितीयः** — प्रतीक्षस्व तावत् ।

**न्यायाध्यक्षः** — नाटचशास्त्रविषयकं किमपि विवक्षितं भवतः ।

**वसुमित्रः** — साधु स्मारितोऽस्मि । नाटचशास्त्राध्ययनं नाम मूलाधारः नाटचलेखनस्य । भासस्य तु अत्रापि अनादरो दृश्यते । (शारद्वतम् उद्दिश्य) अनावश्यकं माम् उदाहरणदानं स्मारयितुम् । तथा हि – एकम् : 'सूत्रधारः पठेत् नान्दीम्' इति तावत् नाटचशास्त्रविदां संप्रदायः । अस्य भासस्य नाटकेषु तु अधरोत्तरम् । 'नान्द्यन्ते ततः प्रविशति सूत्रधारः ।' द्वितीयम् : नाटचभाषायाम् आर्यपुत्र इति शब्दः स्त्रीणां पतिसंबोधन-विषयकः । 'सर्वस्त्रीभिः पतिर्वाच्य आर्यपुत्रेति यौवने ।' इति हि नाटचशास्त्रम् आमनति । सभ्याः ! अस्य भासस्य नाटके तु कञ्चुकी आर्यपुत्रशब्देन राजानं संबोधति । (प्रथमद्वितीयपौरौ साश्चर्यम् अन्योन्यम् अवलोकयतः ।) तृतीयम् : रङ्गमञ्चे केषांचन प्रसङ्गानां साक्षात् प्रदर्शनं नानुमन्यन्ते नाटचशास्त्रकाराः । यथा युद्धम् । भासस्तु 'अभिषेके' वालिसुग्रीवयोः युद्धं रङ्गमञ्चे प्रदर्शयति । एवमेव मृत्युरपि रङ्गमञ्चे निषिद्धोऽस्ति । भासस्तु वालिनः, दशरथस्य, तथा च दुर्योधनस्य मृत्युं रङ्गे दर्शयति । चतुर्थम् : भारतीया परंपरा शोकान्तं नाटकं न सहते । भासेन तु दुर्योधनमरणान्तम् ऊरुभङ्गं प्रणयता पादप्रहारेण दूरोत्क्षिप्तोऽस्ति अयं परंपरापूतो नियमः । पञ्चमम्...

**सौमिल्लकः** — अहमपि स्वयं नाटककारोऽस्मि इति पृच्छामि । एकस्मिन् दाक्षिणात्ये नाटचसंप्रदाये नान्दी न सूत्रकारेण गीयते । सा पूर्वरङ्गे एव अन्तर्भूताऽस्ति । अपि वादी इदं जानाति ?

**वसुमित्रः** — न । नाहं जानामि ।

**सौमिल्लकः** — भवतु । रामायणे सुन्दरकाण्डे रावणस्य सेवकः तम् आर्यपुत्रशब्देन संबोधति । अपीदं भवान् जानाति ?

**वसुमित्रः** — न । इदमपि न जानामि ।

**सौमिल्लकः** — ज्ञायतां तर्हि । अल्पज्ञानं भयावहम् ।

(सभायां हासः ।)

**न्यायाध्यक्षः** — शान्तम् ! शान्तम् ! कृपया वादिभिः सोपालम्भ-वचनानि परित्यज्य केवलं युक्तिवादः कर्तव्यः ।

**सौमिल्लकः** — भवतु । वसुमित्रस्य इमम् आक्षेपं मूलत एव न सहे । न हि वादिना अभिप्रेता दोषा नाम किमपि धर्मशास्त्रोल्लङ्घनम्, येन न्यायालये अभियोगः क्रियेत । अन्ये धर्मशास्त्रनियमाः, अन्ये नाटच-शास्त्रनियमाः । यदि भासेन नाटचशास्त्रस्य नियमानाम् उल्लङ्घनं कृतं स्यात्, तर्हि रसापकृष्टा भवेदपि तस्य कृतिः । किं तु इमं विचारं काचित् रसिकसभा कुर्वीत, न न्यायसभा । अहम् अत्र न्यायालये इदं विचारपद-मेव विरुणद्मि ।

**वसुमित्रः** — अधुनैव ' अल्पज्ञानं भयावहम् ' इति स्मारितोऽस्मि सौमिल्लकेन । अधुना मयापि स स्मार्यते : अल्पस्मृतिरपि भयावहा । (प्रथमद्वितीय-पौरौ अन्योन्यं वीक्ष्य ' साधु प्रतिकृतम् ! ' इति मुखा-विर्भावं कुरुतः ।) मया आदौ एव उक्तम् यथा अयं तावत् केवलम् आनुषङ्गिकः उल्लेखः । अस्ति च तस्य मर्यादितं प्रयोजनम् । इदं स्पष्टी-क्रियते : न केवलं रामायण-महाभारतयोरेव अयं भासः पावित्र्यदूषकः । तस्य स्वभाव एव तादृशः । परंपराभङ्गे स स्वभावत एव रमते । भासस्य इमां मूर्तिभञ्जनप्रवृत्तिं निदर्शयितुमेव मया उदाहरणत्वेन व्याकरण-नाटचशास्त्रविषयिणी भासस्य प्रवृत्तिः निर्दिष्टा । न तु सोऽपि आरोप-विषयः ।

**न्यायाध्यक्षः** — भवतु । प्रकृतं तर्हि अनुसरतु भवान् ।

**वसुमित्रः** — एषोऽनुसरामि । किं तु भासेन सह मम व्यवहारः । अतः स एव प्रतिवक्तु । किमिति तदर्थम् अन्ये ब्रुवन्ति ?

**न्यायाध्यक्षः** — सर्वजनसमक्षा इयं परीक्षा । यः कोऽपि व्यवहार-गतं किमपि युक्तिसंगतं वक्तुम् इच्छति, स तथा कर्तुं प्रभवति ।

**भासः** — भवतु । आर्य ! अतः परम् अहमेव प्रतिवाचं ददामि ।

**वसुमित्रः** — साधु ! सभ्याः ! भगवान् वाल्मीकिस् तावत् आदिकविः । स्वयं पद्मयोनिना ब्रह्मणा तस्मै अव्याहत-ज्योतिः प्रातिभं चक्षुः

प्रसादीकृतम्। व्यासोऽपि च भगवतो विभूतिभूतः मुनीनां मुनिः। सर्वं प्रत्यक्षदर्शिवान् सः। एतयोः त्रिकालज्ञयोः मुनिवरयोः काव्ये न अस्मदादीनामिव लौकिके, किं तु आर्षे महाकाव्ये। वेदसंमितं तयोः पावित्र्यम्। उच्यतेऽपि च : 'भारतं पञ्चमो वेदः।' एवंगुणविशिष्टे रामायणमहाभारते अधिकृत्य यदि कश्चित् अद्यतनीयः प्राकृतः कविः नाटकादिकम् उपनिबन्द्धुं प्रवर्तेत, तर्हि तेन अतीव भक्तियुक्तेन, सावधानेन च प्रवर्तितव्यम्। एतयोः पावित्र्यं यथा अनुज्झिताक्षरम् अक्षुण्णं तिष्ठेत्, तथा करणं तस्य कर्तव्यम्। भासेन तु इदं न कृतम्। रूढिभञ्जनप्रियेण भासेन द्विधा एतयोः विटम्बना कृता : घटनानां प्रक्षेपविपर्यासाभ्यां, पात्राणां च विकृतीकरणेन। प्रक्षिप्ताः प्रसङ्गास् तावत् : अभिमन्युवधोत्तरं श्रीकृष्णेन धृतराष्ट्रं प्रति दूतत्वेन घटोत्कचप्रेषणम्। 'मध्यमव्यायोगे' घटोत्कचेन आक्रान्तस्य सपुत्रकलत्रस्य ब्राह्मणस्य भीमेन मोचनम्। 'दूतवाक्ये' दूतत्वेन धृतराष्ट्रसभां श्रीकृष्णे प्राप्ते कृष्यमाणवस्त्रायाः द्रौपद्याः चित्रावलोकनपरत्वं दुर्योधनस्य। 'ऊरुभङ्गे' गदायुद्धे भग्नोरौ दुर्योधने निपतिते सवधूजनस्य धृतराष्ट्रस्य रणभूमिं गमनम्, तत्र च दुर्योधनेन सह संभाषणम्। 'प्रतिमायां'...

**न्यायाध्यक्षः** — तिष्ठ। अपि प्रतिवादी एतादृशं घटनाप्रक्षेपम् अङ्गीकरोति?

**भासः** — अङ्गीक्रियते मया, आर्य!

**वसुमित्रः** — प्रेक्षन्तां प्रेक्षन्तां सभ्याः। अङ्गीकृतं दूषणं प्रतिवादिना।

**भासः** — अलं त्वरया। मया केवलं तथाविधं प्रसङ्ग-कल्पनम् अङ्गीकृतम्। न दूषणम्।

**वसुमित्रः** — किं मूले अवर्तमानानां प्रसङ्गानां कल्पनमेव न अपराधः?

**भासः** — कथमिव? अस्ति किमपि तद्विरुद्धं मूले?

**वसुमित्रः** — विरुद्धं नास्ति। परं तु...

**भासः** — मूलेन विसंगतम् अस्ति वा?

**वसुमित्रः** — विसंगतमपि न। किं तु यन् मूले नास्त्येव...

**भासः** — तर्हि एतत्प्रसङ्ग-विषये मूलं तटस्थं वर्तते इति वक्तव्यम् । कथं तर्हि अविरुद्धमूलकं रसपरिपोषोद्देशकं मम नवप्रसङ्ग-कल्पनं मूलदूषकम् इति वक्तुं शक्यम् ?

**वसुमित्रः** — अथ वा, यद्यपि तावत् प्रसङ्गविषये एवं वक्तुं शक्यम्, कथं पात्रविषये ?

**भासः** — किं पात्रविषये ?

**वसुमित्रः** — अहो मौग्ध्यम् ! श्रूयतां तर्हि । रामायणे तावत् कैकेयी भरतार्थं राज्यकामुका रामं वनवासाय प्रेषयति । मन्ये स्तनंधयो बालकोऽपि इदं जानाति । (सोल्लुण्ठनम्) तव कैकेयी तु मूर्तिः निर्लोभतायाः ! सा केवलं दशरथाय वचनपूर्तेः अवकाशदानार्थम्, दशरथः असत्यसंधो मा भूत् इत्येव हेतुना, भरतस्य यौवराज्यं प्रार्थयते । वस्तुतः सा निर्लोभैव । तथैव रामस्य वनवासः । पुत्रस्य वियोगेन अन्ते प्राणनाशः मुनिशापवशादेव दशरथस्य ललाटलिखितः आसीत् । तपस्विनी कैकेयी तत्र किं कुर्यात् ? केवलं शापस्य निर्वहणाय अवसर-प्रदानार्थमेव तया रामस्य वनवासः प्रार्थितः । सभ्याः! अग्रे किंचित् श्रूयताम् । किमिति तर्हि एवं चतुर्दशवर्षात्मकः दीर्घोऽवधिः उक्तः, द्वित्राणि दिनान्यपि पर्याप्तानि स्युः इति युक्तमेव कश्चित् शङ्केत । तस्योत्तरं कैकेयी ददाति, सा केवलं प्रमादात् तथा वाणी निर्गता । तस्याः शब्दा एव श्रूयन्ताम् । (पटलात् पुस्तकं गृहीत्वा, उद्घाट्य, अनुकरण-स्वरेण पठति) 'चतुर्दश दिवसा इति वक्तुकामया मया पर्याकुलहृदयया चतुर्दश वर्षाणीति उक्तम् ।' (पुस्तकं पटले क्षिप्त्वा) क्व सा वाल्मीकीया कैकेयी, क्व चेयं भासीया !

**भासः** — अन्यत् किमपि ?

**वसुमित्रः** — अन्यदपि अपेक्ष्यते ? तव कर्णस् तर्हि । महाभारतीयः कर्णस् तावत् स्वार्थैकतत्परः । स प्रथमं ब्राह्मणरूपस्य इन्द्रस्य सकाशात् शक्तिं गृह्णाति, पश्चात् कवचकुण्डले ददाति । शुद्धो विनिमयः । वणिग्वृत्तिः । तव कर्णस्तु उदारधीनाम् अग्रगण्यः । न केवलम् इन्द्रेण प्रार्थितमात्रः स विनिमयस्य नामापि अकृत्वा तस्मै कवचकुण्डले ददाति; पश्चात् इन्द्रेण देवदत्तस्य—

**शारद्वतः** — न देवदत्तस्य। देवदूतस्य।

**वसुमित्रः** — ननु मामपि अध्यापयसि?

**शारद्वतः** -- किं निष्फलेन विवादेन? तत्र पटले पुस्तकं वर्तत एव। प्रत्यक्षीकरोतु भवान्।

**वसुमित्रः** — एष प्रत्यक्षीकरोमि। (पुस्तकं गृहीत्वा, वाचयित्वा, स्वगतम्) सत्यं वदति दास्याःपुत्रः। (प्रकाशम्) ननु भवति कदाचित् दृष्टिदोषः। किं कोलाहलं करोषि? अस्तु देवदूतः। तर्हि पश्चादिन्द्रेण देवदूतस्य हस्ते प्रेषितां शक्तिं 'धिक्! दत्तस्य न प्रतिगृह्णामि' इति प्रथमम् उक्त्वा देवदूतस्य आग्रहवशात्, ब्राह्मणवचनम् अनतिक्रमणीयम् इति कृत्वा, कथंकथमपि अनिच्छया स्वीकरोति। किम् अयं स व्यासेन अभिप्रेतः कर्णः? अधुना एकमेव अन्यत् उदाहरणम्।

**भासः** — किं तत्?

**वसुमित्रः** — दुर्योधनः। महाभारतीयो दुर्योधनस् तावत् अग्रणीः दुर्जनानाम्। नायकः खलनायकानाम्। तव दुर्योधनस्तु महान् सत्यवादी! धार्मिकः! वचनपूर्तिकरः! मातापितृदेवः! प्रत्यासन्नमरणः सः निजं बालपुत्रं पाण्डवान् शुश्रूषितुम्, द्रौपद्यादिकं च स्त्रीवर्गं मातृवत् पूजयितुम् उपदिशति। किमयं दुर्योधनः? मन्ये स्वयं व्यासो यदि अद्य अवतरेत्, तर्हि सोऽपि एतं दुर्योधनं न शक्नुयात् प्रत्यभिज्ञातुम्। कैकेय्याः, कर्णस्य, दुर्योधनस्य इदं गौरवम्, इदं सज्जनीकरणम्, किम् इदं रामायण-महाभारतयोः पावित्र्यविडम्बनं नास्ति?

**भासः** — भवतु। इदं तावत् क्षणम् आस्ताम्। तत् पश्चात् विमृशामः। अन्यत् पृच्छामि। मम नाटके भगवतो रामचन्द्रस्य पात्रं वर्तते नु?

**वसुमित्रः** — वर्तते। 'प्रतिमायाम्' 'अभिषेके' च वर्तते।

**भासः** — अपि मया तत्र रामचन्द्रस्य विषये किमपि अनुदारम् उक्तम्?

**वसुमित्रः** — (विचारयन्) न।

**भासः** — किमपि गर्हणीयम्?

**वसुमित्रः** — न।

**भासः** — किमपि मूर्तिभञ्जनकरम् ?

**वसुमित्रः** — न । किमपि न ।

**भासः** — प्रकारान्तरेण वा तस्य कोऽपि अवमानः कृतः ?

**वसुमित्रः** — (विचिन्त्य) न । नाहं तथा किंचित् स्मरामि ।

**भासः** — भवतु । श्रीकृष्णस्य दौत्यविषयकं 'दूतवाक्यं' नाम मम नाटकं विद्यते ।

**वसुमित्रः** — अस्ति । जानामि ।

**भासः** — अपि मया तत्र पुरुषोत्तमविषये किमपि अनुदारम्, गर्हणीयम्, मूर्तिभञ्जनकरं वा उक्तम् ? प्रकारान्तरेण वा प्रदर्शितम् ?

**वसुमित्रः** — न । तद्विषयेऽपि न ।

**भासः** — भवतु । सीता-द्रौपदीप्रभृतीनां पतिव्रतानां विषये ?

**वसुमित्रः** — न । न ।

**भासः** — व्यास-वाल्मीकि-प्रभृतीनां मुनीनां विषये ?

**वसुमित्रः** — न । कुत्रापि न ।

**भासः** — भीष्म-द्रोण-प्रभृतीनाम् आर्य-जनानां विषये ?

**वसुमित्रः** — न । तेषां विषयेऽपि न ।

**भासः** — ब्रूहि तर्हि । यदि राम-कृष्ण-प्रभृतीनां देवतावताराणाम्, सीता-द्रौपदी-प्रभृतीनां पतिव्रतानाम्, व्यास-वाल्मीकि-प्रभृतीनां ऋषिवराणाम्, भीष्म-द्रोण-प्रभृतीनां च आर्य-पुरुषाणाम्, अन्येषां च माननीयानां विषये मया किमपि अनुचितं, गर्हणीयं, मूर्तिभञ्जनकरं वा कुत्रापि मम नाटकेषु न लिखितम् न वा प्रकारान्तरेण तेषाम् अवमानः कृतः, तर्हि मया रामायण-महाभारतयोः विटम्बना कृता, पावित्र्यभङ्गः कृत इति किम् आधारीकृत्य मां गर्हसे ?

**वसुमित्रः** — आँ ? ... ननु ... एवम् (घर्मं मार्ष्टि ।)

**प्रथमः पौरः** — (जनान्तिकम्) समाप्त इव अयम् ।

**द्वितीयः** — निरुत्तर इव कृतोऽस्ति ।

**तृतीयः** — किं नु अतो भवेत् ?

**प्रथमः** — मन्ये जितं भासेन ।

**राजा** — वसुमित्र ! भासोपरि कृताः दोषारोपाः यदि न सिद्धाः, तर्हि स्वयं दण्डम् अनुभवितुं सिद्धोऽसि नु ?

**वसुमित्रः** — एवम् . . . ननु . . . अहम् . . .

**राजा** — (न्यायमण्डलम् उद्दिश्य जनान्तिकम्) यदि प्रमाणस्वीकरणं परीक्षणं च समाप्तं स्यात् तर्हि उद्घोष्यतां निर्णयः। (न्यायमण्डलं मिथः कर्णोपजापं करोति।)

**शारद्वतः** — (जनान्तिकम्) आचार्य। अस्मदनुकूल इव निर्णयो भविता। (निःश्वसिति।)

**भासः** — तिष्ठ। किमेतावता ? अस्य अभियोगनाटकस्य सूत्रधारः अधुना स्वयमेव रङ्गमञ्चं प्रवेक्ष्यति।

**शारद्वतः** — सूत्रधारः ? को नु ?

**भासः** — पश्य।

**देवरातः** — तिष्ठत। (सर्वे स्तिमिताः प्रेक्षन्ते।) नायं विषयः समाप्तः। ममापि किंचित् वक्तव्यं वर्तते।

**न्यायाध्यक्षः** — कथम् ! आस्थानपण्डितो देवरातः। देवरात ! दत्तानुज्ञोऽसि। कामं ब्रूहि।

**देवरातः** — (भासं प्रति) त्वया 'चारुदत्तम्' नाम नाटकं लिखितम् अस्ति ?

**भासः** — एवम्। अस्ति लिखितम्।

**देवरातः** — तत्र शकारो नाम पात्रं वर्तते ?

**भासः** — वर्तते।

**देवरातः** — अयं शकारः वसन्तसेनां 'अहं त्वां गृहीत्वा केशहस्ते दुःशासनः सीतामिव आहरामि' इति वदति। अन्येऽपि 'केशवृन्दे परामृष्टा चाणक्येनेव द्रौपदी,' 'मम वशमनुयाता रावणस्येव कुन्ती' इत्यादयः अनेके विकृतोल्लेखाः शकारमुखे वर्तन्ते। किमिदं पावित्र्यविडम्बनं नास्ति ?

**भासः** — ननु विनोदार्थं तत्। किं शकारभाषितमपि भवान् परमार्थेन गृह्णाति ?

**देवरातः** — भवतु। 'पञ्चरात्रम्' नाम नाटकं त्वया प्रणीतम् अस्ति ?

**भासः** — अस्ति प्रणीतम्।

**देवरातः** — कोऽस्य नाटकस्य विषयः?

**भासः** — पाण्डवानां विराटनगरे अज्ञातवासः, तस्मिन् काले दुर्योधनेन कृतोः आहरणम्, यज्ञे अनुपस्थितस्य विराटस्य गोग्रहणार्थं कौरवाणाम् अभियानम्, बृहन्नलारूपेण अर्जुनेन विक्रम्य तेषां विद्रावणम्, पत्नीत्वेन प्रदत्तायाः उत्तरायाः स्नुषात्वेन अर्जुनेन स्वीकारः, इत्यादि।

**देवरातः** — अस्मिन् नाटके विशिष्य किं वर्णितम्?

**भासः** — संक्षेपतः, अग्निवर्णनम्—

**देवरातः** — अग्निवर्णनम्?

**भासः** — प्रमादवशात् यज्ञाग्निकृतस्य दाहस्य वर्णनम्।

**देवरातः** — हुँ! 'ज्वलनमित्रो' नु भवान्। युक्तमेव तर्हि। ततस्ततः?

**भासः** — युद्धे गृहीतस्य अभिमन्योः स्वपितृत्वेन अज्ञातैः भीमार्जुनादिभिः सह संपन्नम् ऊर्जस्वलं भाषणम्, तथा अर्जुनस्य चारित्र्यप्रदर्शनम्।

**देवरातः** — अलीकम् इदम्। अन्यः कोऽपि हेतुः नास्ति?

**भासः** — को वाऽन्यो हेतुः?

**देवरातः** — दुर्योधन-प्रशंसनम्। एवं नाम दुर्योधनो यज्ञकरः! एवं नाम दुर्योधनो धार्मिकः! एवं नाम दुर्योधनः सत्यप्रतिज्ञः! ननु रे भास! एतत् सत्य-प्रतिज्ञत्वं दुर्योधने आरोपयितु त्वया सत्यापलापोऽपि कृतोऽस्ति। सप्रमाणम् अहम् इदं प्रदर्शयामि।

**भासः** — शृणोमि तावत्।

**देवरातः** — भोः सभ्याः! अज्ञातवासकालसमाप्तौ पाण्डवाः प्रकटिता भूत्वा स्वीयं राज्यांशं प्रार्थयन्ते। तदा यद् भवति, तत् सर्वेऽपि अत्रभवन्तः जानन्त्येव। कालगणनायां कमपि असन्तं दोषम् उद्भाव्य, पाण्डवैः संकेतपालनं न कृतम् इति असत्यमेव प्रतिपाद्य, दुर्योधनः तेभ्यः राज्यांशदानं प्रत्याख्याति। अत एव च भारतीयं युद्धं प्रवर्तते। एवमेव नु? कच्चित् नाहं प्रमाद्यामि?

**प्रथम-द्वितीय-पौरौ** — एवमेव। एवमेव।

**देवरातः** — साधु। अधुना पृच्छयताम् अयं भासः, किं त्वया

नाटके प्रतिपादितम् इति। अथ वा अहमेव कथयामि। अस्य नाटके किल अज्ञातवासकाले समाप्तिम् आसन्ने आचार्यो द्रोणः दुर्योधनं पाण्डवेभ्यः राज्यांशप्रदानं प्रार्थयते। दुर्योधनस्तु पणबन्धं करोति। यदि पञ्चरात्रेण द्रोणाचार्यः पाण्डवानां प्रवृत्तिम् आनेष्यति, तर्हि राज्यांशं प्रदास्यामि। यतश्च पञ्चदिनाभ्यन्तरे एव संवृत्तेन गोग्रहणप्रसङ्गेन पाण्डवानां प्रवृत्तिः उपलभ्यते, अतः स्वप्रतिज्ञां रक्षन् दुर्योधनः पाण्डवेभ्यः राज्यांशं प्रयच्छति। अपि श्रुतं पौरैः? महाभारतीयो दुर्योधनः स्वप्रतिज्ञां भङ्क्त्वा राज्यांशदानं प्रत्याख्याति। अयं भासीयो दुर्योधनस्तु कियान् सत्यप्रतिज्ञः! द्रोणाय प्रतिश्रुतस्य वचनस्य पूर्त्यर्थं झटिति पाण्डवेभ्यः राज्यांशं प्रयच्छति। दृष्टा सभ्यैः भासकृता इयं महाभारतप्रतारणा? साऽपि च किं सद्धेतुकी? न हि, न हि। दुर्योधनसदृशं नीचपुरुषं पूजयितुम्।

**भासः** — दुर्योधनं पूजयित्वा अहं किं लभेय?

**देवरातः** — त्वमेव जानीयाः। मां किं पृच्छसि? सभ्याः! दुर्योधनं पूजयितुम् 'ऊरुभङ्गे' नाटकेऽपि भासेन एवमेव सत्यापलापः कृतोऽस्ति। महाभारते तावत् भग्नोरुः आसन्नमरणश्च सन्नपि दुर्योधनः 'दिष्टया नाहं परावृत्तो वैरात् प्राकृतवर्जितः' इति वदन्, अविस्मृतवैरः, वैरानुबन्धार्थं रणभूमौ अश्वत्थामानं सैनापत्ये अभिषिञ्चति। चार्वाकोऽपि तावत् ध्रुवं मम अपचितिं करिष्यति इति च स आशास्ते। 'अधर्मेण प्रवृत्तानां पाण्डवानामनेकशः। विश्वासं समयघ्नानां न यूयं गन्तुमर्हथ' इति च दुर्योधनः अश्वत्थामादीन् उपदिशति। यदि कस्यापि अत्र संशयः स्यात्, तर्हि पठतु सः शल्यपर्वणः उपान्त्यम् अध्यायम्। भासीयो दुर्योधनस्तु पश्चात्तप्तः! शान्तवैरः! स्नेहसंसिक्तहृदयः! स स्वयम् अश्वत्थामानं वैरनिर्यातनात् निवारयति। स्वपुत्रं च उपदिशति — (पटलात् पुस्तकं गृहीत्वा, उद्घाट्य, अनुकरणस्वरेण पठति) 'अहमिव पाण्डवाः शुश्रूषयितव्याः। तत्रभवत्याश्च अम्बायाः कुन्त्या निदेशो वर्तयितव्यः। अभिमन्योर् जननी, द्रौपदी च उभे मातृवत् पूजयितव्ये।' अतोऽहं ब्रवीमि, भासेन रामायण-महाभारतयोः विटम्बना कृताऽस्ति। अयं च सत्यापलापः तेन दुर्जनानां गौरवार्थं कृतोऽस्ति इति च पापादपि पापीयः। (पुस्तकं पटले प्रक्षिप्य) ददातु भासः प्रत्युत्तरम्।

**प्रथमः पौरः** — ( जनान्तिकम् ) सयुक्तिकमिव अस्य भाषणं प्रतिभाति ।

**द्वितीयः** — वक्तृत्वमपि घनाघाति !

**तृतीयः** — किं नु भासः प्रतिवदेत् ?

**भासः** — भोः सभ्याः ! आदौ तावत् दुर्जनगौरवरूपं दूषणं परिहरामि । यत् मया कृतम्, न तद् दुर्जनगौरवम्, किं तु मानवस्वभावाविष्करणम् । न हि कविः कंचित् पूजयितुं, कंचिद्वा धिक्कर्तुं नाटकादिं कलाकृतिं रचयति । नाटककारो हि स्वयम् अलिप्तः सन् तेन खलु रूपेण लोकचरितम् उपन्यस्यति, येन तद् आस्वाद्यं भवेत् । इदमपि अहं श्रद्दधामि, यद् यथा कात्स्न्र्येन सज्जनो दुर्लभः, एवं कात्स्न्र्येन दुर्जनोऽपि । अस्ति सर्वस्यापि अन्तरात्मनि कश्चिद् दिव्योंऽशः, यः काले प्राप्ते आत्मानम् आविष्करोति । अत एव आसन्नमरणयोः कर्णदुर्योधनयोः मया कश्चित् सद्गुणः प्रदर्शितः ।

**देवरातः** — किं प्रमाणम् आश्रित्य ? केवलं स्वीयाम् अनर्गलाम् उत्प्रेक्षाम् ?

**भासः** — न । न । मानवस्वभावम् ।

**देवरातः** — महाभारतम् अविगणय्य ? महाभारतं विकृत्य ?

**भासः** — रसोत्कर्षार्थं यद् यत् कर्तुम् आवश्यकम्, तत्तद् कर्तुम् अस्त्येव कविः अधिकारवान् । काव्यसंसारे कविरेव प्रजापतिः खलु ।

**देवरातः** — किं अयं प्रजापतिमन्यः कविः सत्यापलापमपि कर्तुम् अधिकारवान् ?

**भासः** — पण्डितराज ! द्विविधं खलु सत्यम् । वस्तुगतं काव्यगतं च ।

**देवरातः** — (सोल्लुण्ठनम्) काव्यगतं सत्यम् ! ननु नवीनमेव इदं किंचित् श्रूयते । कृपया स्पष्टीकरोतु कविराजः ।

**भासः** — श्रूयताम् । अनन्यपरतन्त्रा हि कविकृतिः । सा हि केवलम् अन्तर्गतान् नियमान् अपेक्षते, कांचित् स्वीयाम् अन्तर्गतां सुसंगतिम् अपेक्षते । न कानपि बाह्यनियमान् । यदि तत्र काचिद् अन्तर्गता सुसंगतिः स्यात्, तथा च कोऽपि अनिर्वचनीयः आनन्दः

समुल्लसेत्, तर्हि तावदेव पर्याप्तम्। न हि ललितकाव्यबन्धेषु बाह्य-सत्यस्य परिपालनापेक्षा क्रियताम्। दुर्योधनादीनां सद्गुणाः समग्रे नाटक-बन्धे सुसंगता वा, न वा, इत्येव द्रष्टव्यम्।

**देवरातः** — किं महाभारतीयेन प्रतिपादनेन तत् सुसंगतं वा, न वा, इति न द्रष्टव्यम्?

**भासः** — न द्रष्टव्यम्।

**देवरातः** — किं भोः, महाभारतादिभ्यः कथावस्तु उपादाय तत्र मूले अव्यभिचारिणी निष्ठा युष्माभिः न आवश्यिका मन्यते?

**भासः** — न आवश्यिका। अन्यत् महाभारतम्, अन्यच्च नाटकम्।

**देवरातः** — किं तु यदि कश्चित् युष्माकं नाटकेभ्यः इतिहासं ज्ञातुम् इच्छेत्, तर्हि तस्य वञ्चना स्यात्!

**भासः** — यदि कश्चित् इतिहासं ज्ञातुम् इच्छेत्, तर्हि तेन महा-भारतं पठितव्यम्। न नाटकं द्रष्टुम् आगन्तव्यम्। किम् अस्माकं कवी-नाम् इतिवृत्तमात्रनिर्वहणेन प्रयोजनम्? अन्यतश्च, नाटकं द्रष्टुमागतेन नाटकं द्रष्टव्यम्, न तत्र इतिहासः परीक्षणीयः। अयुक्तम् उभयोः संकरं कर्तुम्।

**देवरातः** — किं तु कथं प्रेक्षकैः महाभारतं विस्मर्तुं शक्यम्?

**भासः** — तैः विस्मर्तव्यम्, यदि ते रसानुभवमात्रकाङ्क्षिणः। न ऊरुभङ्गम् ऐतिहासिकं नाटकम् इति कृत्वा तैः द्रष्टुम् आगन्तव्यम्, किं तु केवलं नाटकमित्येव।

**देवरातः** — अशक्यं भोः, अशक्यम्! को हि नाम भारतीयः प्रेक्षकः ऊरुभङ्गं पञ्चरात्रं वा द्रष्टुमागतः महाभारतं विस्मर्तुं शक्नु-यात्? (सौमिल्लकम् उद्दिश्य) सौमिल्लक! त्वं स्वयं नाटककारोऽसि। शपथेन ब्रूहि। अपि त्वं भासेन सहमतोऽसि?

**सौमिल्लकः** — (स्वगतम्) हन्त भोः! का गतिः? (प्रकाशम्, कष्टेन) न।

**देवरातः** — श्रुतं सभ्यैः? अयमपि नाटककारो नु? रे भास! एषोऽहं त्वाम् अभियुनज्मि : यत्किमपि हेत्वाभासजालं त्वया प्रसार्यतां

नाम; यत्सत्यं त्वया रामायण-महाभारतयोः विटम्बना कृताऽस्ति, दुर्जनगौरवार्थं च सत्यापलापं कुर्वन्नपि त्वं न अपत्रपसे।

**भासः** — नाहं तथा मन्ये।

**देवरातः** — अहं तु मन्ये।

**भासः** — न तु अहं मन्ये।

**देवरातः** — ननु अहं मन्ये।

**न्यायाध्यक्षः** — शान्तम्। यथा अहं पश्यामि, उभयोरपि पक्षयोः स्वमतस्थापनार्थं यानि प्रमाणानि प्रदेयानि आसन्, तानि समाप्तानि सन्ति। अतः उभावपि वादिनौ इदानीं समासेन स्वस्वपक्षस्य उपसंहारं कुरुताम्।

**वसुमित्रः** — देवरात एव मम प्रतिनिधीभूय वादिपक्षस्य उपसंहारं करिष्यति।

**न्यायाध्यक्षः** — भवतु। अनुमतम्।

**देवरातः** — सभ्याः! प्रतिपादितपूर्वमेव अस्माभिः यद् वेदसंमिते आर्षमहाकाव्ये रामायण-महाभारते नाम अस्माकं राष्ट्रियजीवनस्य अविभाज्यः अंशः, अतश्च न केनापि स हेलयाऽवलोकनीयः इति। भासेन तु अत्र निरर्गलं स्वातन्त्र्यम् अवलम्बितम् इति मन्यामहे।

अस्माभिः सप्रमाणं प्रदर्शितमस्ति, यत् रामायण-महाभारते उपजीव्य स्वनाटकानि रचयता भासेन मूलगतानां घटनानां विपर्यासः कृतोऽस्ति, तत्रस्थानि च पात्राणि विकृत्य उपस्थापितानि सन्ति। एवं कुर्वता प्रतिवादिना न केवलं मूलद्रोहः, सत्यापलापोऽपि कृतोऽस्ति।

किं च, रामायण-महाभारतयोः एवं पावित्र्यविटम्बनं कुर्वता भासेन असंख्यातानाम् आस्तिकजनानां श्रद्धायां क्रूरं प्रहृतम्, तेषां च मनांसि पीडितानि।

न च प्रतिवादिना इदम् अकार्यम् अबुद्धिपूर्वकं कृतम् इति वक्तुं शक्यम्, यतः भासस्य मूर्तिभञ्जनप्रवृत्तेः, परंपराभङ्गप्रवणतायाश्च अन्यान्यपि उदाहरणानि अस्माभिः उपन्यस्तानि सन्त्येव।

न मम नाटकानि रामायणमहाभारतोपजीव्यतया द्रष्टव्यानि, किंतु स्वतन्त्रत्वेन द्रष्टव्यानि इति प्रतिवादी मन्यते। एतयोः आर्षकाव्ययोः

अस्माकं रक्तगतत्वात् तद् अशक्यम् इति वयम् असकृत् अवोचामैव। किं च व्यासेन सह स्पर्धते इव अयम् आत्मानं द्वितीयमिव व्यासं मन्यमानो भासः। कतरो युष्माभिः इष्यते, व्यासः उत भासः ?

न मया कस्यापि पूज्यपुरुषस्य अवमानः कृतः इति प्रतिवादी कथयति। किं तु नैतत् पर्याप्तम्। पूज्यावमान इव दुर्जनगौरवमपि परिहार्यम्। भासेन च तत्र तत्र दुर्जनगौरवस्य न कोऽपि अवसरः हापितः इति प्रमाणितमेव अस्माभिः।

कवीनां निरङ्कुशत्वं प्रतिवादी समर्थयते। सभ्याः ! जगति न कोऽपि निरङ्कुशोऽस्ति।

**दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति।**
**दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥**
**सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः।**
**दण्डस्य हि भयात् सर्वं जगद् भोगाय कल्पते ॥**

इति स्मृति-वचनमेव अत्र प्रमाणम्। अतः यदि कश्चित् कविरपि उच्छृङ्खलो भूत्वा जगतः अनर्थाय स्यात्, तर्हि सोऽपि दण्ड्यताम् एति।

सभ्याः ! भाविनो महतोऽनर्थस्य बीजम् अद्य उप्तम् इति मन्यामहे। अनेन ज्वलनमित्रेण क्षिप्तोऽयं स्फुलिङ्गः श्वः उद्दामो भूत्वा कस्मिंश्चित् वडवानले परिणमेत्। अद्य तावत् दुर्जनगौरवम्। श्वः पूज्यावमानः नैव भवेत्, इति को नु ब्रूयात् ? अस्मिन् पापिनि कलौ किं किं भवेत्, को नु वेद ? रामादयोऽपि दुर्जनाः भविष्यन्ति, रावणादयश्च सज्जनाः। किं च 'रावणादिवत् वर्तितव्यम्, न रामादिवत्' इत्यपि कवयः सूचयेयुः। कदाचित् तादृशः कविसंप्रदाय एव अद्ययावत्कः गण्येत। न शकारः एकाकी स्यात्, कश्चित् संप्रदाय एव स भवेत्। सभ्याः! अस्यानर्थस्य प्रहाणहेतोः, समाजस्य मानसिक-निकोपतायाः संरक्षणार्थम्, भाविनाम् एतादृशानाम् अपराधिनाम् आतङ्कजननार्थं च इयं विषवल्ली अद्यैव मूले छेत्तव्या इति मन्यामहे। मूर्तिभञ्जनकरः, पावित्र्यविडम्बने च रममाणोऽयं कविः कठोरतः कठोरं दण्डम् अनुभावनीयः इति वादिपक्षः साग्रहं प्रतिपादयते।

(न्यायाध्यक्षः भासं प्रति दृष्टिपातं करोति ।)

**भासः — नमोऽस्तु ते व्यास विशालबुद्धे**
**फुल्लारविन्दायतपत्रनेत्र ।**
**येन त्वया भारततैलपूर्णः**
**प्रज्वालितो ज्ञानमयः प्रदीपः ॥**

**कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।**
**आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥**

सभ्याः ! ऋषिकवी व्यासवाल्मीकी नाम प्रातःस्मरणीयानां धुरि स्थितौ। तयोश् चरणारविन्दयोः कस्य वा दुर्भाग्यस्यापि न पतेत् प्रणामः? अशक्यं हि तयोः आनृण्यं गन्तुम्, विशेषतश्च अस्माभिः कविभिः ।

न त्वेतावता इदम् आयाति, यत् महाभारतादीनाम् उपजीविषु नाटकेषु अपि मूलकथा अनुज्झिताक्षरा परिपालनीयेति । सा केवलं नाटककाराणां सामग्री । यत् सत्यं सकृत् नाटकादि-कलाकृतेः वस्तुभूता सा महाभारतादिरूपेण नैव अवतिष्ठते । तस्याः पुनर्जन्म इव भवति । अतः नाटकपरीक्षणे अयं मूलनिष्ठाविचारः वस्तुतः अमूल एव ।

यतः काव्यस्य प्रयोजनसिद्धये मूलपरिवर्तनम् आवश्यकं भवति, अतः मया इष्टानि परिवर्तनानि कृतानि इत्युक्तपूर्वमेव मया । रसोत्पादनेन आनन्दनिर्मितिर्हि कवेः प्रयोजनम्, न इतिवृत्तकथनमात्रम् । एतत्प्रयोजनसिद्ध्यर्थं यत्किमपि परिवर्तनं कर्तुम् अस्त्येव कवेः अधिकारः । यदि अद्यतनीयेन काव्यशास्त्रेण इदं स्वीकृतं न स्यात्, श्वस्तनीयं काव्यशास्त्रं तत् अङ्गीकुर्यात् इति मे दृढो विश्वासः ।

दुर्जनगौरवस्य आरोपः मया पूर्वमेव परिहृतः । यन्मया कृतम्, न तद् दुर्जनगौरवम्, किं तु मनुष्ये गूढस्य परमात्मरूपस्य दर्शनम् । ऐतिहासिकः कदाचित् इदं न पश्येत्, कविस्तु पश्यत्येव । अन्यथा स कविरेव न स्यात् ।

वाल्मीकिव्यासयोः कृतयो नाम काचित् खनिरेव । तस्याः खनेः सुवर्णम् उद्धृत्योद्धृत्य, अलंकाररूपेण च परिणमय्य वयं रसिकेभ्यः समर्पयामः । अतो हेतोः व्यासादीनां संतोष एव जायेत । अथ वा एवमपि

वक्तुं शक्यम् : यदा प्राचीनाः अलंकाराः यातयामाः भवन्ति, नवाः अलंकाररूढयः उत्पद्यन्ते, तदा पूर्वे अलंकाराः अग्नौ विलाप्यन्ते, नवेन रूपेण च निर्मीयन्ते । न कोऽपि तद् 'अहो मूर्तिभञ्जनम्' इति आक्रोशति । तथैव इदम् । व्यासवाल्मीकिभ्यां घटिताः अलंकाराः अस्माभिः केवलं नवेन रूपेण परिणमय्य उपस्थाप्यन्ते । मन्ये स्वयं व्यासवाल्मीकी अपि 'अहो नवनवोन्मेषशालिता भासप्रतिभायाः ! आवाभ्याम् अदृष्टोऽर्थः भासेन दृष्टः, आवाभ्याम् अचिन्तितं रूपं भासेन कल्पितम्' इति मनसि प्रमुदितावेव भविष्यतः ।

सभ्याः ! एतावता रामायणमहाभारतयोः पावित्र्यविटम्बनम्, सत्यापलापः, मूर्तिभञ्जनम, दुर्जनगौरवम् इत्यादीनि यानि दूषणानि मयि वादिपक्षेण आरोपितानि, तानि मया समस्तानि निरस्तानि सन्ति । अहं निष्पापोऽस्मि ।

**न्यायाध्यक्षः** — उभयपक्षस्थापनं समाप्तमस्ति । कैश्चिदेव क्षणैः निर्णयः प्रकटीकरिष्यते । (न्यायमण्डलं किमपि कर्णान्तिकभाषणपरम् । अत्रान्तरे)

**प्रथमः पौरः** — (जनान्तिकम्) किं तर्कयसि ? को जेष्यति ?

**द्वितीयः** — पण्डितः । कोऽत्र संशयः ? कथं नाम तेन दणदणायितम् ।

**तृतीयः** — ननु अत्र युक्तिवादः प्रधानम् । न गर्जनम् ।

**चतुर्थः** — उभावपि पक्षौ युक्तौ भातः । दुष्करं खलु न्यायकरणम् ।

**प्रथमः** — तथापि वादिपक्षः समीचीन इव भाति ।

**शारद्वतः** — (जनान्तिकम्) आचार्य ! किं तर्कयति भवान् ?

**भासः** — किम् अचिरभाविनः तर्कणेन ? तथापि प्रतिकूलापेक्षिणः पण्डिताः ।

**न्यायाध्यक्षः** — शान्तम् ! शान्तम् ! सभ्याः ! उभाभ्यामपि वादिभ्यां स्वपक्षपुरस्कारार्थम् उपन्यस्तानि प्रमाणानि न्यायमण्डलेन सौक्ष्म्येण परीक्षितानि । स्वीयेषु नाटकेषु रामायणमहाभारतगतानां घटनानां पात्राणां च विपर्ययं कुर्वता भासेन एतयोः पावित्र्य-भङ्गः कृतः इति वादिपक्षः । नेति प्रतिवादिपक्षः ।

तत्र आदौ तावत् प्रतिवादिनः व्याकरणस्य नाटचशास्त्रस्य च अनादरदर्शनार्थं वादिपक्षेण यद् उक्तम्, तद् अस्य न्यायालयस्य अधिकाराणां बहिर्भूतत्वात् नास्माभिः विचार्यते।

महाभारतादिगतासु घटनासु पात्रस्वभावे च कृतं परिवर्तनं प्रतिवादी अपि अङ्गीकुरुते। नाटचस्य भिन्न-प्रयोजनत्वात् कवेश्च सर्वाधिकारसंपन्नत्वात् न तत्र किमपि अनुचितम् इति भासस्य आशयः।

घटनास् तावत् द्विविधाः। नवीनतया कल्पिताः, पूर्वा एव वा विपरिवर्तिताः। तत्र नवकल्पिताः सत्योऽपि या घटनाः मूलेन न विसंगताः विरुद्धा वा, न तासां कल्पने कोऽपि दोषः इति न्यायमण्डलं मन्यते।

विपरिवर्तितानां घटनानां पात्रस्वभावानां च विषये तु नायं न्यायः। तत्र यदि इदं विपरिवर्तनं मूलेन न संगतम्, विरुद्धं वा, तर्हि तत् चिन्त्यं भवति। नाटककारस्य अत्र किमपि स्वातन्त्र्यं भवति इति न्यायमण्डलम् अङ्गीकरोति। तत्तु न अमर्यादम्। नाटकं न केवलं कविसंनिधौ तिष्ठति। सर्वसमाजव्यापि तत्। अतः समाजोपरि तस्य परिणामोऽपि विमर्शनीयः।

एवं विचार्यमाणे भासेन कविस्वातन्त्र्यमर्यादाः उल्लङ्घिताः सन्ति इति न्यायमण्डलेन निर्णीतमस्ति। तेन यत् कृतम्, न तत् केवलं विपरिवर्तनम्। विपर्यास एव सः। रामायणमहाभारतयोः अस्मज्जीवने वर्तमानं स्थानं प्रेक्षमाणा वयं भासेन तयोः पावित्र्यभङ्गः कृतोऽस्ति इति निर्णयामः। अहेतुकः स्यादपि, किं तु अन्ततः अपराध एव अयम्। रामायण-महाभारतयोः पावित्र्यविडम्बनार्थम् इदं न्यायमण्डलं भासम् अपराधिनं मन्यते। (शारद्वतः सभयं भासं प्रेक्षते। सौमिल्लकः शनकैः भासं हस्ते गृह्णाति।)

इदानीं दण्ड-विषये। यद्यपि अपराधः स्थापितोऽस्ति, तथापि एतदपराधार्थं धर्मशास्त्रे न कोऽपि विशिष्टो दण्डः निर्दिष्टोऽस्ति। यतः इदंप्रथमः एतादृशोऽपराधः। इदं वीक्ष्य, तथा च प्रतिवादिनो भासस्य चारित्र्यम्, धार्मिकता, सामाजिकं च स्थानम् अवेक्ष्य सः अदण्डं मोचनीयः

इति न्यायमण्डलं मनुते । (सौमिल्लक-शारद्वतौ सहर्षं भासं प्रेक्षेते ।) इदं विमोचनम् ... ...

**देवरातः** — मा तावत् भोः । किमर्थम् एवं महान् अपराधी इत्थम् अदण्डो विमुच्यते ?

**न्यायाध्यक्षः** — वादी प्रागेव समाप्ताधिकारोऽस्ति । यदि सः पुनरेवं मध्ये मध्ये ब्रूवीत, तर्हि स न्यायातिक्रमो गण्येत । — प्रतिवादिनः इदं विमोचनं तु समयपूर्वकम् अस्ति । कोऽसौ समयः इति चेत्, भासेन अपराधार्थं क्षमायाचना कर्तव्या, न च ईदृशम् अकार्यं पुनः करिष्यामि इति प्रतिज्ञालेखः कर्तव्यः ।

**भासः** — किमर्थं क्षमायाचना? को वा अपराधः? न मया कोऽपि अपराधः कृतोऽस्ति, न च मे कापि क्षमा याचनीयाऽस्ति । मया तावत् कविधर्मः आचरितः । यदि युष्माकं दण्डशास्त्रानुसारेण अयं दण्डार्हः अपराधः स्यात्, तर्हि कामं दीयतां यथेष्टो दण्डः । एष सिद्धोऽस्मि अनुच्चारितविरोधाक्षरः तम् अनुभवितुम् । नाहं लोभाद्वा, राजभयाद्वा, गुर्वादरवशाद्वा (राजा 'भाऽऽस' इति तारम् आक्रोशति ।) न वा, कुतोऽपि अन्यस्मात् कारणात् क्षमायाचनां करिष्यामि । स्वधर्मे निधनं श्रेयः ।

**न्यायाध्यक्षः** — ननु वत्स (स्वगतम्) धिक् ! अयुक्तोऽयं समुदाचारः । (प्रकाशम्) भोः अभियुक्त, एष ते निश्चयः ?

**भासः** — आर्य । बाढम्, एष मे दृढो निश्चयः ।

**न्यायाध्यक्षः** — (स्वगतम्) का गतिः ? (प्रकाशम्) श्रूयतां तर्हि दण्डः । अभियुक्तस्य राजकवेः भासस्य राजकवित्वम् अद्यप्रभृति प्रतिसंहृतम् अस्ति । अस्य च कुकवेः सर्वाणि नाटकपुस्तकानि सपदि अग्निसात् कर्तव्यानि इति न्यायमण्डलम् आदिशति । (स्वगतम्, सखेदम्) हन्त ! कृतं न्यायाध्यक्षसदृशं कर्म !

**शारद्वतः**— मा तावत् भोः । योऽयं भासकविः एवं सदाचारः, धार्मिकः, निःस्पृहः, आस्तिकः, गोब्राह्मणानां पूजयिता, महान् विष्णुभक्तः, यो निजनाटके राक्षसानां मुखादपि मातृभक्तिं पातिव्रत्यं च स्तौति, मित्रत्वं च प्रशंसति . . .

**राजा** — कः कोऽत्र भोः ? अपसार्यताम् अयं न्यायावमानकारी बटुः । (राजपुरुषः अग्रतः सरति । सौमिल्लकः तं संज्ञया निवार्य शारद्वतं हस्तेन नियमयति । क्रमेण प्रथमं राजा, ततो न्यायमण्डलम्, ततश्च अन्ये सभ्याः पौराश्च निष्क्रान्ताः । सौमिल्लकः एकेन हस्तेन शारद्वतम्, अपरेण च भासं गृहीत्वा तिष्ठति । क्रमेण रङ्गमञ्चे अन्धकारः । कैश्चित् क्षणैः पृष्ठभूमौ ज्वालाः समुत्तिष्ठन्ति । अनुपदं च सडिण्डिमध्वनि घोषणा श्रूयते : 'भोः भोः पौराः ! शृणुत । एतानि रामायणमहाभारतदूषकस्य अतश्च राजकविपदात् भ्रंशितस्य भासस्य नाटकानि अग्निसात् क्रियन्ते । यः कोऽपि इतःपरम् एवम् अकार्यम् आचरिष्यति, स इतोऽपि तीक्ष्णतरं दण्डम् अवाप्स्यति ।' डिण्डिमध्वनिः । सौमिल्लकः तथैव भासं शारद्वतं च अवलम्ब्य तिष्ठति । त्रयोऽपि मूर्तिवत् निश्चलाः ।)

(पटाक्षेपः ।)

## द्वितीयं दृश्यम्

(कालः — पूर्वदृश्यात् सप्ताहोत्तरः ।)

[ स्थानम् : भासगृहम् । जवनिकायाम् उत्क्षिप्तायां संगीता उपकरणानां पुटीकरणव्यापारा दृश्यते । गृहम् आकुलम् । संगीता अलंकारशून्या, सामान्यधवलवस्त्रधारिणी च । अस्मिन् दृश्ये सा भूयसा दृढसंदष्टोष्ठा, अल्पवाक्, कार्यव्यापारे आत्मविस्मरणप्रयत्ना च । ]

**संगीता** — ( कैश्चित् क्षणैः ) चतुरिके !

(प्रविश्य)

**चतुरिका** — इयमस्मि, स्वामिनि ।

**संगीता** — एतानि वस्त्राणि गृहाण । तुभ्यं दत्तानि ।

**चतुरिका** — (तथैव तिष्ठति ।)

**संगीता** — ननु गृहाण ।

**चतुरिका** — न हि । न मे हस्तः प्रसरति ।

**संगीता** — ( बलात् तस्याः हस्ते क्षिप्त्वा ) मम स्मरणीयं भवतु । (पुनरपि कार्यव्यग्रा ।)

**चतुरिका** — को वा सकृत् परिचितः स्वामिनीं विस्मरिष्यति ? (कैश्चित् क्षणैः) स्वामिनि !

**संगीता** — (प्रश्नमुखी प्रेक्षते।)

**चतुरिका** — क्व गम्यते ?

**संगीता** — (बध्यमानात् उपकरणात् दृष्टिम् अनिवर्त्य) यत्र आर्यपुत्रः नेष्यति।

**चतुरिका** — स्वामिनि ! मामपि तत्र नय।

**संगीता** — त्वं किमर्थं दुःखं निमन्त्रयसे ?

**चतुरिका** — एवं विहाय गच्छथः। किमिति तर्हि एवं स्नेहो जनितः ? ननु अत्र आगतौ एव किमर्थम् ? (सगद्गदा)

**संगीता** — (मृदुस्वरेण) अलं शोकेन। ईदृश एव जीवलोकः।

**चतुरिका** — ननु युवयोर् गतयोः अहमत्र किं कुर्याम् ?

**संगीता** — नूतनो गृहस्वामी आगमिष्यति। स तथैव सेव्यः, यथा आवाम्।

**चतुरिका** — को नु आगमिष्यति ?

**संगीता** — को नु वेद ? स्यात् देवरदेवः सौमिल्लकः, अथ वा (कटुस्वरेण) वसुमित्रः।

(ततः प्रविशति शारद्वतेन अनुगम्यमानः भासः। ७/८ दिवसेषु ७/८ वर्षैरिव वृद्धः। आगत्य श्रान्तः आसने उपविशति।)

**भासः** — ओह। विस्मृत इव पादचारः। इयता अल्पश्रमेणापि श्रान्तोऽस्मि।(व्यजनं गृहीत्वा आत्मानं वीजयितुं प्रारभते। शारद्वतः तस्य हस्तात् व्यजनं गृहीत्वा तं वीजयति।) अलम्। अलम्। नास्मि संप्रति अहं राजकविः।

**शारद्वतः** — आचार्य। मा भूत् भवान् राजकविः। कविराजत्वं तु आचार्यस्य को नाम अपहर्तुं प्रभवेत् ?

**संगीता** — (उपकरणानि एकत्र स्थापयन्ती) दृष्टाः गुरुचरणाः ?

**भासः** — दृष्टाः।

**संगीता** — (तथैव कार्यव्यापृता) किमाहुः ?

**भासः** — किं ब्रूयुः ? उक्तवन्तः – "वत्स ! अधिकारः अपराध्यति। नैव जनः। अपि वेत्तुं शक्ष्यसि (हृदये हस्तं निधाय) किमत्र ज्वलति ? त्वयापि नाम कुतः इदम् अकार्यं चिन्तितम् ?" इति।

आमूलचूलं कम्पिताः सन्ति ते अनेन शिष्यगतेन वृत्तान्तेन। (चिन्तयित्वा) मन्ये इष्टजनदुःखायैव भासस्य जन्म।

**शारद्वतः** — किमिति अकारणम् आत्मानम् एवं निन्दति आचार्यः?

**भासः** — अकारणम्? एवम् अकृत्रिमसुहृद् राजा पीडितः। कारुण्यसिन्धुः गुरुः पीडितः। इयं च सर्वासु अवस्थासु अनुगता भार्या पीडिता।

**संगीता** — (सहसा त्वेषेण) मम पीडा तावत् तिष्ठतु। अस्त्येव वा मम किमपि पृथक् सुखदुःखम्? अहं तावत् युष्माकं सुखदुःखयोः अर्धभागिनी। आर्यपुत्रेण किं सुखं लब्धम्? अयं सर्वनाश एव नु? मया इदं ज्ञातमिव आसीत्, अतः तदानीमेव उक्तम् : कामं जनः नावीन्यप्रियः, न तु क्रान्तिसहः।

**शारद्वतः** — आचार्य! ननु ब्रवीमि, महान् अयम् अन्यायः संवृत्तः। को नाम राजदण्डस्यापि अधिकारः एवं कवीन् नियमयितुम्?

**भासः** — मा। मैवं वद। अन्ततो गत्वा कविरपि अन्यतरः पक्षः। अस्ति तस्य प्रतिपादने अधिकारः। न तु निर्णये। निर्णयकरं किमपि तटस्थं शासनम् आवश्यकमेव। अन्यथा सर्वत्र निर्मर्यादं भवेत्।

**शारद्वतः** — किं तु एवं क्रूरो निर्णयः?

**भासः** — का गतिः? सोढव्यम्। (स्मृत्वा) त्वया शकट-व्यवस्था संपादिता?

**शारद्वतः** — कृता, आचार्य! अचिरेणैव आगमिष्यति शकटम्।

**भासः** — साधु। अन्यच्च, नूतनं विचारं प्रचारयित्रा तदर्थं क्लेशसहनायापि सिद्धेन भवितव्यम्। नान्यथा तस्य निष्ठा सिध्येत्। तथापि, इदमेकं तु नावबुध्यामि।

**शारद्वतः** — किं तत्?

**भासः** — तेन जगन्नाटक-सूत्रधारेण इयं प्रेरणैव मह्यं किंनिमित्तं दत्ता? यदि च दत्ता, किमिति स्वयमेव तेन एवं मम नाटकानि समूलनाशं नाशितानि? (शारद्वतः किमपि विवक्षुः विचार्य आत्मानं धारयति।) एवं नैर्घृण्यं तेन कुतः आचरितम्? कुतः?

**संगीता** — (अधुना गलितसंयमा) औरसम् अपत्यं तावत् आवयोर् नास्त्येव । वाङ्मयीनम् अपत्यजातमपि दैवेन एकैकं शूल्यमांसभर्जितम् । कविताकामिन्याः हासो भासः स्वयम् अहासः संवृत्तः !

**शारद्वतः** — आचार्य ! अद्याहं प्रथमदिनं स्मरामि । तदानीम् आचार्येण उक्तमासीत् : शारद्वत ! नाटचं न महापुरुषाणामेव जीवने वर्तते, युष्मदस्मदादीनामपि जीवने तद् वर्तते। केन तदानीम् उत्प्रेक्षितम् आसीत्, स्वयम् आचार्यस्यापि इदं भीषणं नाटचम् अनुभवनीयं स्याद् इति?

**संगीता** — शोकान्त-नाटकस्य आद्यः प्रवर्तयिता नाटककारः स्वयमेव तस्य बलीभूतः । अहो वक्रता दैवस्य !

**भासः** — मैवं मंस्व । इयं केवलम् अङ्कसमाप्तिरपि स्यात् । जीवन-नाटकं भवेदपि अमृताङ्कम् ।

**संगीता** — (क्षणं दीप्तमुखी) किम् आशास्ते आर्यपुत्रः ?

**भासः** — अलम् अन्यथाग्रहं कर्तुम् । नाहं तादृक् किमपि अभिप्रैमि । जीवन-नाटकस्य एकोऽङ्कः भवतु नाम दुःखदः, अन्ततो गत्वा भगवद्भजनेन जन्मसाफल्यम् अवाप्य शक्यं जीवितं मङ्गलान्तं कर्तुमिति मे आशयः । अधुना तदेव आरब्धव्यम् ।

**शारद्वतः** — आचार्य । मामपि तत्र नयतु, यत्र भवान् प्रस्थितः ।

**भासः** — किमिदं मौढचम् । अद्यापि अवकाशोऽस्ति ते । अधुना त्वं निजं गृहं गच्छ । अधीष्व । वर्धस्व ।

(नेपथ्ये : ‘ तिष्ठतम् । गावौ ! तिष्ठतम् । ’)

**शारद्वतः** — शकटं प्राप्तमिव । (निष्क्रम्य, पुनः प्रविश्य) आचार्य! प्राप्तं शकटम् ।

**भासः** — (उत्थाय उपकरण-भारं ग्रहीतुं प्रवृत्तः) भवतु तर्हि। प्रतिष्ठामहे । वत्स ! सुखं जीव । (शारद्वतः धावित्वा भासस्य पादयोः पतति । भासः तमुत्थाप्य आलिङ्ग्य तस्य पृष्ठे शनकैः हस्तेन परामृशन् आस्ते ।) वत्स ! किमेवं माम् अनुबध्नासि ? नाहं किमपि तुभ्यं दातुं पारितवान् । व्यर्थमेव त्वं मया पुत्रीकृतः ।

**शारद्वतः** — मा । मैवं भणतु आचार्यः । स्वगृहे अननुभूतं वात्सल्यम् अत्र युवयोः सकाशात् मया प्रकामम् अनुभूतम् । यन्मया त्रिचतुरेषु

मासेषु एतत्पादयोः अधीतम्, तद् अन्यत्र त्रिचतुरैः वर्षैरपि न शक्नुयाम् अध्येतुम् ।

**भासः** — (चिन्तयन्) किं तुभ्यं स्मरणीयं ददामि ? धिक् ! नाटकमपि न किंचित् अवशिष्टम्, यत् तुभ्यं प्रसादीकुर्याम् ।

(मुखे व्यथा)

**शारद्वतः** — (किमपि निर्धार्य) आचार्य ! अलं खेदेन । युष्माकं समग्रं नाटकचक्रं मम समीपे वर्तते ।

**भासः** — (साश्चर्यम्) मम समग्रं नाटकचक्रं तव समीपे वर्तते ? वत्स, कोऽयम् आमन्त्रण-काले परिहासः ?

**संगीता** — क्रूरैः एकैकं पुस्तकं विचित्य विचित्य अग्निसात् कृतम् । कुतस् तव समीपे समग्रं नाटकचक्रं वर्तेत ?

**शारद्वतः** — यतो मया नाटकानि तत्र स्थापितानि सन्ति, यत्र न राजभयम्, न वा अग्निभयम् । (संगीता-भासौ केवलं साश्चर्यं तं प्रेक्षेते । शारद्वतः स्वशिरः प्रति अङ्गुलिनिर्देशं कृत्वा) आचार्य ! अत्र भासनाटक-चक्रं सुरक्षितं वर्तते ।

**भासः** — शारद्वत !

**संगीता** — वत्स !

**शारद्वतः** — अम्ब ! स्मरसि ? प्रथमदिने एव मया उक्तमासीत् : अतितीव्रा मे स्मृतिः । सकृत्पाठी अस्मि, इति । सकृत् पठितमपि चिरकालं मम स्मृतौ तिष्ठति, किं पुनर् यत् पौनःपुन्येन पठितम्, गौरवेण पठितम्, जिह्वाग्रे लालितम्, हृदयस्य अन्तस्तमे पुटे निहितम् ? — आचार्य ! जातो मे कार्यनिर्णयः । पुनरपि अहम् उज्जयिनीं निवर्तिष्ये । अहं तत्र सर्वाः आचार्यकृतीः पुनरपि पत्रार्पिताः करिष्यामि । नटवर्गं संग्रहीष्यामि । तत्र उज्जयिन्यां भवतो नाटकानां प्रयोगान् संपादयिष्यामि । तत्र किंचिद् भिद्यते स्थितिः । नैवम् आचार्यस्य सुभाषितम् अङ्गे एव जरिष्यति । अथ वा यदि कुतोऽपि कारणात् इदं शक्यं नाभूत्, मम पुत्रपौत्रान् भवदीयानि नाटकानि वेदवत् अध्यापयिष्यामि, येन स्वाध्यायरूपेण तानि जीविष्यन्ति । यदि इदमपि न घटितम्, नाटकचक्रं कुत्रापि स्थाने सुरक्षितं स्थापयिष्यामि । कुत्रापि सरस्वती-भाण्डागारे । तत्र तत् शयिष्यते । निर्भयम् ।

शान्तम्। कमपि रसिकं प्रतीक्षमाणम्। कमपि गवेषणपरं सहृदयं प्रतीक्षमाणम्। कदाचित् वर्षाणि। कदाचित् वर्षशतानि। कदाचित्, को नु वेद, एकद्वे सहस्रके अपि। अन्ततो रात्रिर् गमिष्यति। कस्मिंश्चिच्च सुप्रभाते कश्चित् भाग्यवान् रसिकः पुनरपि इमं निधिं दैववशात् आसादयिष्यति। स तं पालयिष्यति। लालयिष्यति। पुनरपि च रसिकजगति तं मुक्तहस्ताभ्यां वितरिष्यति। शतकोत्तरम्, सहस्रकोत्तरम्, पुनर्लब्धस्य अस्य नाटचनिधेः जनता हर्षनिर्भरं स्वागतं वदिष्यति। आचार्य। मास्तु राजसिंहेन भवद्भ्यः नाटकचक्रवर्तिपदं प्रदत्तम्, भाविनी जनता निःसंशयं भासं नाटकचक्रवर्तिपदेन गौरविष्यति। (भासः संगीता च मन्त्रमुग्धे इव तिष्ठतः।)

**भासः** — (स्वप्नात् प्रबुद्ध इव) शारद्वत! नाहम् एवं दीर्घदर्शी। तव अन्तःस्फुरणं त्वम् अनुसर, यथा मया निजम् अनुस्रियते। एकं तावत् अनुसृतमेव। अधुना द्वितीयम्। संप्रति अतीतोऽस्मीव नाटचलेखनव्यापारम्। यदि तु कदाचित् पुनः तादृशी प्रवृत्तिः संजातैव, यदि च लेखनी गृहीता, तर्हि सा अवशिष्टस्य एकमात्रस्य अभिलाषस्य पूर्त्यै स्यात्: कालिन्दीपुलिने क्रीडासक्तस्य, गोपगृहेषु दधिदुग्धेन सहैव गोपीहृदयान्यपि चोरितवतः मधुमधुरस्य तस्य निर्व्याजबालब्रह्मणः गोपालकृष्णस्य चरितकीर्तनार्थम्। (नेपथ्ये शाकटिक-ध्वनिः — 'त्वर्यताम्, त्वर्यताम् भोः।') आस्तां तावत्। (नेपथ्याभिमुखो भूत्वा) एते प्रस्थिता एव वयम्। (सर्वे द्वित्राणि पदानि गच्छन्ति। ततः प्रविशति ससंभ्रमं सौमिल्लकः।)

**सौमिल्लकः** — सखे! किं न्विदम्? त्वम् इदं स्थानं विहाय प्रस्थितोऽसि इति श्रूयते। न किमपि मह्यं निवेदितम्!

**भासः** — वयस्य, किं इयं विजययात्रा, येन उद्घोष्येत? अधुना मादृशस्य अलक्षित-निर्गमनमेव युक्तम्। सखे! स्मर तावत्। (तं परिष्वजते।) प्रतिष्ठामहे। (स्वगतमिव) 'तं नन्दनन्दनममन्दसुखस्य कन्दम् ...' (ततः प्रविशति ससंभ्रमं भटः।) भद्र! पुनरपि त्वम्। किमिदानीम्?

**भटः** — आर्य! पौरजनात् विदितभवत्प्रस्थानो देवो विज्ञापयति–

**भासः** — किमाज्ञापयति देवः ?

**भटः** — न हि न हि । देवेन उक्तम् : "विजयवर्मन् ! गत्वा भासकविं विज्ञापय, यदि नासि राजकविः, मा भूर्नाम । ममानुरोधात्तु सुहृद्रूपेण यथापूर्वम् अत्रैव वस्तुम् अर्हसि ।"

**भासः** — भद्र ! देवं ब्रूहि । किम् अपरिचितोऽहं तव अभ्यन्तरस्य? तथापि एवं गते नेदम् उचितम् । आश्रितोऽहं संप्रति परमदेवपादम्, इति । (पुनरपि गन्तुं प्रवृत्तः ।)

**शारद्वतः** — आचार्य ! अनुगृह्णातु भवान् अन्तिमेन आशीर्वचनेन ।

**भासः** — (भरतवाक्यम्)

**शंखक्षीरवपुः पुरा कृतयुगे नाम्ना तु नारायणस्**
**त्रेतायां त्रिपदार्पितत्रिभुवनो विष्णुः सुवर्णप्रभः ।**
**दूर्वाश्यामनिभः स रावणवधे रामो युगे द्वापरे**
**नित्यं योऽञ्जनसंनिभः कलियुगे वः पातु दामोदरः ॥**

(शनैः शनैः सर्वे निष्क्रान्ताः)

इति तृतीयोऽङ्कः ।

समाप्तम् 'भासोऽहासः'

